कालिकारिष्ट (कृष्णतिल-सदृश बिन्दु) बुद्धि, धैर्य, स्मरणशक्ति का नाश करनेवाला है॥ २९८॥ यदि यह एक स्थान पर इकट्ठा नहीं है तो प्रयत्न में बाधा नहीं करता। दारी (बिवाई के समान खड्ग में दरारें दिखाई देना) नामवाला अरिष्ट सभी कामनाओं का नाशक है। यह अनेक गुणों से सम्पन्न होने पर भी ग्रहण करने के अयोग्य है॥ २९९॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

कपोतपक्ष प्रतिममरिष्टं चेत् तदाह्वयम्। भर्तुः कुलं यशो विद्यां बलं बुद्धिञ्च नाशयेत्॥ ३००॥
काकाकृतिर्यदारिष्टं काकारिष्टं तदोच्यते। अनेन भर्तुः संग्रामे भङ्ग एवोपजायते॥ ३०१॥
अरिष्टे खर्पराकारे खर्परारिष्टमुच्यते। भर्तुर्यशोबलं वीर्यं बुद्धिं प्रीतिञ्च नाशयेत्॥ ३०२॥
यदान्यल्लोह शकलं लग्नं स्यादिव लक्ष्यते। शकलीति स वै खड्गः सर्वाभीष्टनिषूदनः॥ ३०३॥
(क्रोडीकुशपत्रकयोर्लक्षणे पतिते)
यस्मिन् निम्नमिवाभाति मध्ये वा दृष्यते क्वचित्। जालारिष्टमिदं नाम भर्त्तुः कुलधनापहम्॥ ३०४॥
एकैकरेखा दीर्घाग्रा यदा पल्लविनी भवेत्। स्पर्शे वाथ करेणाथ करालारिष्टमुच्यते॥ ३०५॥
अयं हि क्षितिपालानां दृष्टियोग्यो भवेन्नहि। दर्शनादेव नश्यति यशो लक्ष्मीजयादयः॥ ३०६॥
अरिष्टे कङ्कपत्राभे कङ्कारिष्टं तदुच्यते। अस्य स्पर्शनमात्रेण नश्यत्यायुर्यशो बलम्॥ ३०७॥
खर्ज्जूरवृक्षप्रतिमं यदारिष्टस्तु लक्ष्यते। खर्जूरारिष्टमेतत् स्याद् भर्त्तुः कुलधनापहम्॥ ३०८॥
गोशृङ्गाभमरिष्टं चेत् शृङ्गारिष्टं तदुच्यते। अनेन भर्त्तुर्नश्यन्ति लक्ष्मीबलकुलादयः॥ ३०९॥
गोपुच्छाकृतिश्चेत् खड्गे अरिष्टं संप्रतीक्ष्यते। पुच्छारिष्टमिदं नाम भर्त्तुः सर्वार्थनाशनम्॥ ३१०॥

कपोत (कबूतर) के पङ्ख-सदृश अरिष्ट धारण करनेवाले का कुल, यश, विद्या, बल और बुद्धि का नाश करता है॥ ३००॥

कव्वे की आकृतिवाला अरिष्ट काकारिष्ट कहलाता है। इससे संग्राम में स्वामी का भङ्ग ही होता है॥ ३०१॥

खर्पर (ठीकरा) के सदृश खर्पर-अरिष्ट कहलाता है। यह स्वामी के यश, बल, वीर्य, बुद्धि और प्रीति का नाश करता है॥ ३०२॥

जब खड्ग में लोह का दूसरा टुकड़ा-सा लगा हुआ दिखलाई देता है तो वह खड्ग शकली अरिष्टवाला होता है, जो सभी मनोरथों को समाप्त करनेवाला होता है॥ ३०३॥

(इस प्रकरण में क्रोडी और कुशपत्रक अरिष्टों के लक्षणवाले श्लोक नहीं हैं)—जिस खड्ग में उसका धरातल कहीं-कहीं नीचा दिखाई पड़ता है अथवा मध्यभाग नीचा दिखाई देता है, उसे जालारिष्ट कहते हैं। यह स्वामी के कुल और धन की समाप्ति करनेवाला है॥ ३०४॥

जब एक-एक रेखा अगले भाग में स्थूल या हस्तादि से स्पर्श में पत्राकार अनुभव प्रतीत हो, तो इसे करालारिष्ट कहते हैं। यह खड्ग राजाओं को देखना भी नहीं चाहिये। इसके दर्शनमात्र से यश, धन और विजयादि समाप्त हो जाते हैं॥ ३०५-३०६॥

कङ्कपत्र (कंघी) के सदृश अरिष्ट होने पर उसे कङ्क-अरिष्ट कहते हैं। इसके स्पर्शमात्र से ही आयु, यश और बल नष्ट हो जाते हैं॥ ३०७॥

जब खजूर के वृक्ष-सदृश अरिष्ट दिखाई दे तो उसे खर्जूर-अरिष्ट कहते हैं। यह स्वामी के कुल और धन का अपहरण करनेवाला है॥ ३०८॥

गाय के सींग के सदृश शृङ्ग-अरिष्ट कहलाता है, इससे स्वामी की लक्ष्मी, बल और कुलादि नष्ट हो जाते हैं॥ ३०९॥

जब खड्ग में गाय की पूँछ के सदृश आकृतिवाला अरिष्ट दीखे तो उसे पुच्छ-अरिष्ट कहते हैं। यह स्वामी के सब कार्यों का नाशक है॥ ३१०॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खनित्राभमरिष्टं चेत् खनित्रारिष्टमुच्यते। शूराणामपि संग्रामे भङ्गमेतत् प्रयच्छति॥ ३११॥
अरिष्टे लाङ्गलाकारे लाङ्गलारिष्टमुच्यते। अयं पापात् पापतरः प्रेक्षणीयो न भूभुजा।
अयमायुः श्रियं हन्ति विद्यां बलमशेषतः॥ ३१२॥
(बडिशारिष्टस्य लक्षणं पतितम्)
इत्यरिष्टानि प्रोक्तानि नाना तन्त्राद् प्रयत्नतः। विचार्यैतानि मतिमान् खड्गं कोशे निधापयेत्॥ ३१३॥
दिङ्मात्रमिदमुद्दिष्टमरिष्टानां हितात्मनाम्। अमङ्गलानां मन्दानां दर्शनञ्चाशुभावहम्॥ ३१४॥
अरिष्टमेकमेव स्याद् द्विररिष्टं शुभावहम्। अन्यान्यमशुभं हन्याद् विषस्य हि विषं यथा॥ ३१५॥
एकमारभ्य सप्तान्तमरिष्टं प्राह नान्यथा। यथोत्तरं द्विगुणितं फलमाहुर्मनीषिणः॥ ३१६॥

अथ द्विविधाभूमिः —

दिव्यभौमविभागेन भूमिर्या द्विविधा मता। दिव्या दिवि समुद्भूता भौमा भूमिसमुद्भवा॥ ३१७॥
तल्लक्षणमशेषेण लिख्यते तन्निबोधत। देवदानवयोर्मध्ये खड्गसृष्टिरभूत् पुरा।
ते खड्गाः पुण्यदेशेषु केषु केषु प्रतिष्ठिताः॥ ३१८॥

खनित्र (कुद्दाल-खुरपा आदि) के सदृश अरिष्ट खनित्र-अरिष्ट कहा जाता है। यह संग्राम में शूरवीरों को भी पराजित करा देता है॥ ३११॥

लाङ्गल (हल या कलिहारी) के समान आकृतिवाला लाङ्गल-अरिष्ट होता है। यह अत्यन्त निकृष्ट है। इसे राजा को देखना भी नहीं चाहिये। यह आयु, यश, विद्या और बल का सम्पूर्णरूप से नाशक है॥ ३१२॥

(पूर्व निर्दिष्ट बडिश=मछली पकड़ने का काँटा, अरिष्ट का लक्षण नहीं दिया)—इन अरिष्टों को अनेक शास्त्रों से प्रयत्नपूर्वक इकट्ठा करके कहा है। बुद्धिमान् को चाहिये कि इनका विचार करके ही (शुभाशुभ लक्षण देखकर) खड्ग को कोश (म्यान) में रखे तथा शुभ लक्षणोंवाला खड्ग ही धारण करे॥ ३१३॥

अपने लिए हितकारी अरिष्टों का भी दिग्दर्शन कराया जाता है। अमाङ्गलिक और मन्द अरिष्टों का दर्शन भी शुभकारक नहीं है॥ ३१४॥

पूर्वोक्त अरिष्टों में एक ही अरिष्ट खड्ग में हो तो वह अशुभकारक है, यदि दो अरिष्ट हों तो वे शुभकारक हैं, क्योंकि एक के अशुभ प्रभाव को दूसरा समाप्त कर देता है जैसे कि विष का औषध विष होता है॥ ३१५॥

एक से लेकर ७ तक संख्या में अरिष्ट होना शुभकारक है। इससे अधिक नहीं।

मनीषी (खड्गशास्त्रवेत्ता) एक से अधिक अरिष्ट होने पर क्रमश दुगना, तीन गुणा आदि फल कहते हैं॥ ३१६॥

अब दो प्रकार की भूमि को कहते हैं—दिव्य और भौम के विभाग से दो प्रकार की भूमि खड्ग की होती है। दिव्य भूमि स्वयं ही पूर्व से रहती है और भौम को बनाया जाता है (खड्ग पर ओषधि प्रलेप या पानी चढ़ाना आदि से निर्माण किया जाता है)॥ ३१७॥

इसके सभी लक्षणों को यहाँ लिखा जाता है, इनको जानो।

पहले देवों और दानवों में खड्ग का सर्जन (निर्माण) हुआ। वे खड्ग कुछ पुण्य-स्थानों

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दिव्यलक्षणं यथा—

ये खड्गाः स्थूलधारा भृशमतिलघवो निर्मलाङ्गाः सुनेत्राः। ये रिष्टाश्चास्वरूपाः सुविमलतन-वश्चाप्यसंस्कारयोग्यात्। दुर्भेद्या दुर्घटाश्च ध्वनिगुणमुखो यत् क्षते दाहपाकौ ते दिव्याः कुर्वतेऽमी कुलधनविजयश्रीयशोवृद्धिमाशु॥ ३१९॥

अथ भौमलक्षणम्—बृहद्हारीते—

पूर्वं महेशेन विषाणि यानि भुक्तानि तेषां पतितास्तु बिन्दवः। यस्मिन् प्रदेशे स एव देशः कालायसामाकरतां जगाम॥ ३२०॥ पुरामृतं क्षीरसमुद्रमध्यादुत्पाद्य संगृह्य ययुः सुरेन्द्राः। तद् बिन्दवो यत्र निपेतुरेष शुद्धायसामाकरतां जगाम॥ ३२१॥

ये विषोत्था भृशं कालाः खराङ्गाः सम्भवन्ति हि। मूर्च्छादाहज्वरानाहः शोकहिक्का वमीकराः॥ ३२२॥

येऽमृतोत्था कर्व्बुराङ्गाः मन्दाङ्गाः सम्भवन्ति च। वलीपतितमालिन्यज्वरव्याधिविनाशनाः। यत्रेव पतितं यत् तु तत्तदाकरतां गताः॥ ३२३॥

तद्यथा

वाराणसीमगधसिंहलभूमिभागे नेपालभूमिषु तथाङ्गमहीप्रदेशे।
सौराष्ट्रिकेऽन्यतरधन्यमहीविभागे शुद्धायसां कृतिवराः प्रवदन्ति जन्म॥ ३२४॥

में स्थापित किये गये॥ ३१८॥

जो खड्ग मोटी धारवाले, तीक्ष्ण, हल्के, निर्मल अङ्गोंवाले, सुनेत्र (शुभसूचक चिह्नादि), अरिष्टों से रहित, सुन्दर आकृतिवाले, बिना संस्कार (पानी चढ़ाना) आदि के ही सुन्दर रहनेवाले, दूसरे के शस्त्राघात से न टूटनेवाले, कठिनकर्मवाले, गुरु (गम्भीर) ध्वनिवाले जिनके द्वारा आहत होने पर दाह और पाक होता हो वे दिव्य होते हैं। ये सभी कुल, धन, विजय, श्री, और यश की बहुत शीघ्र ही वृद्धि करनेवाले होते हैं॥ ३१९॥

पुराकाल (क्षीरसागर मन्थन) में भगवान् शिव ने जिन विषों का पान किया, उनके कुछ बिन्दु जिस देश में गिरे वहीं पर लौहे की खानें बन गईं॥ ३२०॥

पुराकाल में क्षीर-समुद्र से देवता अमृत का मन्थन करके ले-जा रहे थे तब उसके बिन्दु जहाँ-जहाँ पड़े वहीं शुद्ध लोहे की खानों की उत्पत्ति हो गई॥ ३२१॥

जो खड्ग विष की उत्पत्ति (काले लोहे) से बने हुए होते हैं वे बहुत काले, खर अङ्गवाले होते हैं। इनके आघात में मूर्च्छा, दाह, ज्वर, अफारा, शोक, हिक्का (हिचकी) और वमन होती है॥ ३२२॥

जो अमृत से उत्पन्न (शुद्ध लोहे के बने हुए) हैं वे कबूतरी रङ्गवाले, हल्के होते हैं। ये चेहरे की झुर्रियाँ, खिन्नता, ज्वर और अनेक व्याधियों के नाशक हैं॥ ३२३॥

जहाँ (पूर्वोक्त विष और अमृत के बिन्दु) जो बिन्दु पड़ा वहीं वैसी ही खानें उत्पन्न हो गईं।

जैसे वाराणसी, मगध, सिंहलभूमि (लङ्का), नेपाल, अङ्गदेश, सौराष्ट्र और अन्य देशों की भूमियों में भी शुद्ध लोहे की खाने हैं॥ ३२४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वाराणसेयाः सुस्निग्धास्तीक्ष्णधारा सदाङ्गिनः। लघवः सुखसन्धेया ज्ञेयाश्चाभेद्यशालिनः ॥ ३२५ ॥
मागधाः कर्कशाः स्थूलधारा गूढतरङ्गिणः। गुरवो दुःखसन्धेयाः खड्गा ज्ञेया विचक्षणैः ॥ ३२६ ॥
नेपालदेशप्रभवा निरङ्गा निश्चलाश्च ये। ज्ञेयाः सदङ्गा मलिना लघवः स्थूलधारिणः ॥ ३२७ ॥
कलिङ्गागुरवः स्वच्छा व्यक्ताङ्गास्तन्तुहेतवः। सौराष्ट्रा निर्मलाः स्निग्धाः सुव्यक्ताङ्गा भृशं खराः ॥ ३२८ ॥
सिंहलद्वीपजातानां चतुर्धा भेदमुच्यते। केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः ।। ३२९ ॥
एषां रूपेण मिश्रेण ज्ञेया हि द्विजजातयः ॥ ३३० ॥
सामान्याद् द्विगुणञ्चौण्ड्रं कलिर्दशगुणस्ततः। कलेः शतगुणं भद्रं भद्राद् वज्रं सहस्रधा ॥ ३३१ ॥
वज्रात् षष्टिगुणः पाण्डिर्निरविर्दशभिर्गुणैः। ततः कोटिसहस्रेण ह्ययस्कान्तः प्रशस्यते ॥ ३३२ ॥

(इत्यादिकं रसायनोपयोगिकमेव न तु खड्गे दृष्टफलम्)

यदाह

एषां तु लौहजातीनां वज्रं खड्गाय युज्यते ॥ ३३३ ॥

तथा च

ये खड्गास्तीक्ष्णधारा भृशमतिगुरवः षड्गुणाढ्याः सुभेद्याः। केचित् साङ्गा निरङ्गा कतिचन

वाराणसेया (वाराणसी में बननेवाले) खड्ग चिकने, तीक्ष्णधारवाले, अच्छे अङ्गोंवाले, हल्के, सुख से चलाने योग्य और न टूटनेवाले होते हैं ॥ ३२५ ॥

मगधदेश के खड्ग, कर्कश (कठोर), मोटी धारवाले, गूढ अङ्गोंवाले, भारी, कठिनता से धारण करने योग्य बुद्धिमानों को जानने चाहियें ॥ ३२६ ॥

नेपालदेश में होनेवाले खड्ग निरङ्ग, निश्चल, अच्छी आकृतिवाले, मलिन, लघु और स्थूलधारवाले होते हैं ॥ ३२७ ॥

कलिङ्ग देश के खड्ग भारी, स्वच्छ, स्पष्ट आकृतिवाले, रेखाओंवाले या (चित्रकारीयुक्त) होते हैं। सौराष्ट्र के खड्ग निर्मल चिकने, स्पष्ट आकृतिवाले और बहुत कठोर होते हैं ॥ ३२८ ॥

सिंहलद्वीप (लङ्का) में बने हुए खड्गों के चार भेद होते हैं—कुछ सुन्दर अङ्गोंवाले, भारी, कर्कश, चिकनी धारवाले और कुछ सुन्दर आकृतिवाले, हल्के या छोटे, चिकने, मोटी धारवाले होते हैं। इनके परस्पर मेल से ब्राह्मण, क्षत्रिय-वैश्यात्मक जातिवाले खड्ग जानने चाहियें ॥ ३२९, ३३० ॥

सामान्य लोहे से दो गुणा चौण्ड्र, उससे दश गुणा कलि, कलि से सौ गुणा भद्र, भद्र से हज़ार गुणा वज्र, वज्र से साठ गुणा पाण्डि, पाण्डि से दश गुणा निरवि और उससे भी करोड़ों गुणा उत्तम अयस्कान्त लौह होता है ॥ ३३१-३३२ ॥

(परन्तु इनकी रसायनकार्य=भस्मादि बनाने में ही उपयोगिता कही है। खड्ग-निर्माण में ऐसा फल नहीं देखा गया) जैसा कहा भी है—

इन लौह की जातियों में वज्रलौह खड्ग के लिए जितना उपयुक्त हैं, (इतना अधिक अन्य लौह गुणकारी नहीं है, यह अभिप्राय है) ॥

जो खड्ग तीक्ष्णधारवाले, बहुत अधिक भारी, छह गुणों से युक्त, सुगमता से भेदने योग्य,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समला निर्मलाः केचिदेव। ते भौमाः कुर्वतेऽमी धनविजयबलं षड्गुणा निर्गुणा वा, ते दुःखं स्तोकमुग्रं दधति बलकुलश्रीयशोनाशनास्ते॥ ३३४॥

अथाष्टधा ध्वनिः —

ध्वनिरष्टविधः प्रोक्तो यः पूर्वं सूत्रसंग्रहे। तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम्॥ ३३५॥

तद्यथा

हंसकास्ये तथामेघः ढक्का काकश्च तन्त्रिका। गर्दभः प्रस्तरश्चैव ध्वनिरष्टविधः स्मृतः॥ ३३६॥

पूर्वे चत्वारः शुभदाः परे निन्दास्पदास्तथा। विचार्य खड्गमानञ्च कर्तव्यं खड्गकोविदैः॥ ३३७॥

घोरस्तार इति ख्यातो द्विविधः खड्गकोविदैः। घोरः स्यात्सुखसम्पत्त्यै तार उच्चाटने मतः॥ ३३८॥

यत्र हंसरवस्येव खड्गे नखहतध्वनिः। हंसध्वनिरयं खड्ग सकलार्थप्रसाधनः॥ ३३९॥

कांस्यशब्द इवाभाति यस्मिन्खड्गे हते ध्वनिः। कांस्यध्वनिरयं खड्गः प्राह नागार्जुनो मुनिः॥ ३४०॥

(अभ्रस्य लक्षणं पतितम्)

ढक्काशब्द इवाभाति यस्मिन्खड्गे हते ध्वनिः। ढक्का ध्वनिरयं खड्गः सर्वशत्रुनिषूदनः॥ ३४१॥

काकस्वर इवाभाति यस्मिन्खड्गे हते ध्वनिः। काकस्वरोऽयं खड्गः स्याच्छ्रीयशः कुलनाशनः॥ ३४२॥

कुछ अङ्गोंवाले और कुछ निर्मल हों वे भौमखड्ग होते हैं। ये धन, विजय, बल आदि छह गुणों की वृद्धि करनेवाले और जो गुणरहित होते हैं वे धारण करने पर दुःखदायी बल, कुल, श्री, यश को समाप्त करनेवाले होते हैं॥ ३३४॥

पूर्व सूत्रों के संग्रहों में आठ प्रकार की जो ध्वनियाँ कही है, उनमें से मैं गुणसहित आठ लक्षणोंवाली ध्वनियों को यहाँ लिखता हूँ॥ ३३५॥

हंस, कांस्य, मेघ, ढक्का, (झाँझ) कव्वा, लघु ध्वनि, गर्दभ (गधा) और पत्थर के सदृश— ये आठ प्रकार की ध्वनियाँ कही हैं॥ ३३६॥

पहली चार शुभ हैं और अगली चार निन्दित हैं। खड्ग ज्ञान के जाननेवालों को खड्ग का मान (लम्बाई, चौड़ाई, मोटाई) सोचकर निश्चित करना चाहिये॥ ३३७॥ घोर (मोटा) और तार (हल्का) ये दो भेद खड्ग के मानानुसार होते हैं। घोर सुखसम्पत्तिकारक और तार इनका नाशक है॥ ३३८॥

जिस खड्ग से नाखून (चुटकी) द्वारा बजाने पर हंस की ध्वनि के सदृश ध्वनि निकलती हो, उसे हंसध्वनि खड्ग कहते हैं। यह सभी कार्यों का साधक हैं॥ ३३९॥

जिस खड्ग के बजाने पर कांस्य (कांसी के बर्तन सदृश) ध्वनि निकलती हो उसे नागार्जुन मुनि ने कांस्यध्वनिवाला खड्ग कहा है॥ ३४०॥

[अभ्र-(विद्युत्)-ध्वनि का लक्षणात्मक सूत्र नहीं है]—जिस खड्ग से ढक्का (झाँझ) के सदृश ध्वनि निकलती हो, उसे ढक्का ध्वनिवाला खड्ग कहते हैं। यह सभी शत्रुओं का नाश करनेवाला है॥ ३४१॥

जिस खड्ग के बजाने से काक-(कव्वे के स्वर-जैसी)-ध्वनि निकलती हो, उसे काक-ध्वनिवाला खड्ग कहते हैं। यह श्री, यश और कुल का नाशक है॥ ३४२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः। तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः॥ ३४३॥
खरस्येव ध्वनिर्यस्मिन् खरध्वनिरयं मतः। श्रीयशोज्ञानविज्ञानजयतेजो विनाशनः॥ ३४४॥
प्रस्तरस्येव यः खड्ग स निन्द्यः खड्ग लक्षणे॥ ३४५॥
गभीरतारध्वनिता खड्गस्य शुभलक्षणम्। उत्तानमन्द्रध्वनिता खड्गस्याशुभलक्षणम्॥ ३४६॥
अपाङ्गनेत्रहीनोऽपि खड्गः सुध्वनिरुत्तमः। अन्धः कुरूपो मनुजो यथा भुवि सुगायनः॥ ३४७॥
सर्वलक्षणसम्पन्नः खड्गो यो ध्वनिवर्जितः। स निन्द्यः सुन्दराङ्गोऽपि यथा वाक्यविवर्जितः॥ ३४८॥
नखेन वाथ दण्डेन तथा लौहशलाकया। लोष्ठेन शर्कराभिर्वा ध्वनिविज्ञानमुच्यते॥ ३४९॥

अथ द्विविधं मानम्—

यन्मानं द्विविधं प्रोक्तं तस्य लक्षणमुच्यते। उत्तमाधमभेदेन भेदो हि द्विविधो मतः॥ ३५०॥
उत्तमं यद् विशालं स्याल्लघुमानं प्रकीर्नितम्। अधमं तच्च यत् खर्व्वं गुरुमानं प्रकीर्तितम्॥ ३५१॥
तत् पुनस्त्रिविधं प्रोक्तमादिमध्यान्त भेदतः॥ ३५२॥
यो मुष्टिं विंशतिसमायततीव्रधारो भर्त्तुर्भवेत् प्रसरतोऽपि षडङ्गुलोभिः।
मानेन चाष्टपलिकः स हि खड्गमध्ये नातिप्रकृष्टं न विकृष्टफलप्रदः स्यात्॥ ३५३॥

तन्त्री (वीणा) के समान ध्वनि जिससे निकलती हो उस खड्ग को तन्त्रीध्वनि कहते हैं। यह कुल, श्री और धन का नाश करनेवाला है॥ ३४३॥

जिस खड्ग को बजाने से गधे के समान ध्वनि निकलती हो, उसे खरध्वनि कहते हैं। यह श्री, यश, ज्ञान, विज्ञान, जय और तेज का नाश करनेवाला है॥ ३४४॥

पत्थर के सदृश ध्वनिवाला खड्ग भी निन्दित है॥ ३४५॥

गम्भीर और ऊँची (देर तक होनेवाली) ध्वनिवाला खड्ग शुभकारक है और सीधी (बिना गूँजवाला) तथा धीमी ध्वनि खड्ग का अशुभ लक्षण है॥ ३४६॥

अङ्ग और नेत्ररहित खड्ग भी यदि सुन्दर ध्वनिवाला हो तो उत्तम होता हैं। जैसेकि लोक में अन्धा और कुरूप व्यक्ति भी सुन्दर गानेवाला हो तो वह अच्छा माना जाता है॥ ३४७॥

सभी अच्छे लक्षणोंवाला होने पर भी ध्वनिरहित खड्ग निन्दनीय है, जैसेकि सुन्दर आकृतिवाला पुरुष मूक (गूँगा) या मीठा न बोलनेवाला अच्छा नहीं माना जाता॥ ३४८॥

नख (चुटकी), दण्डा, लौहशलाका, ढेला या छोटी कङ्करी से खड्ग में ध्वनि की जाती है॥ ३४९॥

अब दो प्रकार के मान को कहते हैं—मान दो प्रकार का कहा है उसका लक्षण कहते हैं, उत्तम, अधम भेद से दो भेद मान के होते हैं॥ ३५०॥

जो खड्ग विशाल एवं हल्का हो उसे उत्तम मानवाला और जो छोटा तथा भारी हो उसे अधम मानवाला खड्ग कहते हैं॥ ३५१॥

आदि मध्य और अन्त के भेद से उसके तीन भेद होते हैं॥ ३५२॥

जो बीसमुष्टि लम्बा, तीक्ष्ण धारवाला, धारण करनेवाले की छह अङ्गुलीमान-प्रसार-(चौड़ाई)-वाला आठ पल या अधिक भारवाला खड्ग हो, वह न शुभ और न अशुभ फल

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

यो द्वादशाष्टनवमुष्टिभिरायतः स्यात्, मन्दो भवेत् प्रसरतोऽपि चतुर्थभागः।
तावत् पलैः परिमितस्तु ततोऽधिको वा, खड्गाधमो धनयशःकुलनाशनाय॥ ३५४॥

नागार्जुनोऽपि—

यावत्यो मुष्टयो दैर्घ्ये तदर्द्धाङ्गुलयो यदा। प्रसरे तच्चतुर्थांशमिति वै मानमुत्तमम्॥ ३५५॥
यावत्यो मुष्टयो दैर्घ्ये प्रसरे तत् त्रिभागिकः। पलैस्तदर्धैस्तुलितः स खड्गो मध्य उच्यते॥ ३५६॥
यावत्यो मुष्टयोदैर्घ्ये तुल्यांशः प्रसरे तु तत्। अधमः कीर्तितः खड्गस्तत्समो वाधिकः पलैः॥ ३५७॥
भौमानामिदमुद्दिष्टं दिव्यास्तु लघवो मताः॥ ३५८॥

भोजस्तु—

दीर्घता लघुता खरविस्तीर्णता तथा। दुर्भेद्यता सुघटता खड्गानां गुणसंग्रहः॥ ३५९॥
खर्व्वता गुरुता चैव मन्दता तनुता तथा। सुभेद्यता दुर्घटता खड्गानां दोषसंग्रहः॥ ३६०॥

(इति निखिलमुदारमुक्तमत्र बहुतन्त्रेषु निष्कृष्य खड्गयष्टे)
नृपतिरिति विचिन्त्य यो विधत्ते स चिरतरां श्रियमुच्छ्रितां लभते॥ ३६१॥

(इति श्रीभोजराजीये युक्तिकल्पतरौ खड्गपरीक्षा)

देनेवाला होता है॥ ३५३॥

जो बारह, आठ या नौ मुष्टि लम्बा, इनका चतुर्थांश चौड़ा मन्द, इतने ही (१२-८-९) पल भारवाला या अधिक भारवाला खड्ग अधम होता है। यह धन, यश और कुल का नाश करता है॥ ३५४॥

नागार्जुन ने भी कहा है—जितनी मुष्टि लम्बाई हो, उतनी ही अंगुलियों के आधे भाग का चौथा भाग चौड़ाई उत्तम मान कहा है॥ ३५५॥

जितनी मुष्टि लम्बाई हो प्रस्तार (चौड़ाई) में उसका तीसरा भाग (अङ्गुलों में) उन (मुष्टियों) से पलों का भार आधा हो, उसे मध्यम खड्ग कहते हैं। जितनी मुष्टि लम्बाई हो उतने ही अंगुल चौड़ाईवाला और उसके समान या अधिक पलभारवाला अधम खड्ग कहा है॥ ३५६, ३५७॥

यह लक्षण भौम खड्गों के कहे हैं। दिव्य खड्ग लघु (छोटे या हल्के) होते हैं॥ ३५८॥

लम्बाई, हलकापन, खरता, विस्तार (चौड़ाई) दुर्भेद्य, सुघड़ आकार ये खड्गों के गुण होते हैं॥ ३५९॥

छोटापन, भारीपन, मन्द (कुण्ठित), छोटा आकार, शीघ्र ही टूट जाना, बद शकल (कुरूपता) ये खड्गों के दोष होते हैं॥ ३६०॥

(यहाँ खड्गों के समस्त लक्षणादि बहुत-से शास्त्रों से संग्रह करके कह दिये हैं।)

इन सब गुण वा गुणों को विचार करके जो इसे धारण करता है, वह चिरकाल तक रहनेवाली लक्ष्मी को प्राप्त करता है॥ ३६१॥

(यह श्रीभोजराजकृत 'युक्तिकल्पतरू' ग्रन्थ में खड्ग परीक्षात्मक अध्याय समाप्त हुआ।)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नीतिप्रकाशिकायां खड्गचालनस्य द्वात्रिंशद् विधयः।

(अध्याय ३)

द्वात्रिंशत् करणानि स्युर्यानि खड्गप्रयोधने। चित्रशीघ्रपदं तानि दैत्यसङ्घे न्यदर्शयत्॥ २४॥
भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं विप्लुतं सृतम्। संयातं समुदीर्णञ्च निग्रहप्रग्रहौ तथा॥ २५॥
पादावकर्षसन्धाने शिरोभुजपरिभ्रमौ। पाशपादविबन्धाश्च भूम्युद्भ्रमणके तथा॥ २६॥

सीतारामकृततत्त्वविवृत्तिः—

भ्रान्तं भ्रमणम्। उद्भ्रान्तमूर्ध्वभ्रमणम्। आविद्धं भुग्नम्। आविद्धं कुटिलं भुग्नमित्यमरः। आप्लुतं हरिणवत् प्लुतम्। विप्लुतं विशेषप्लवनम्। सृतमनुसरणम्। संयातं सम्यग्यानम्। समुदीर्णं सम्यक् तरणम्। निग्रहोऽधिक्षेपः। प्रग्रहो दृढग्रहणम्॥ २५॥

पादावकर्षः पादप्रान्तेन खड्गनमनम्। सन्धानं शत्रूपरि विन्यासः। शिरो भ्रमणं भुजपरिभ्रमणम्। पाशः खड्गयोर्ग्रथनं प्रसिद्धम्। पादः त्सरुमिश्रणम्। खड्गयोर्मिश्रणम्। पाशः पादोमुष्टिर्विमिश्रणमिति मेदिनी। विबन्धः खड्ग निरोधनम्। भूमिरधोविन्यासः उद्भ्रमणक-मुच्चैरुद्धृतिः॥ २६॥

---

१. भ्रान्त—चारों ओर तलवार घुमाना।
२. उद्भ्रान्त—हाथ को ऊपर उठाकर घुमाना।
३. आविद्ध—तिरछा घुमाना।
४. आप्लुत—हरिण के समान छलांग लगाना।
५. विप्लुत—विशेष छलांग लगाना।
६. सृतम्—शत्रु का अनुकरण करते हुए जाना।
७. संयातम्—शत्रु पर हावी होना।
८. समुदीर्णम्—तलवार चलाते हुए शत्रुदल से बाहर निकलना।
९. निग्रह—तलवार से प्रहार करना।
१०. प्रग्रह—दृढता से तलवार को पकड़े रहना।
११. पादावकर्ष—पैर तक खड्ग को झुकाना।
१२. सन्धान—शत्रु पर प्रहार करना।
१३. शिरो-भ्रमण—सिर के ऊपर तलवार घुमाना।
१४. भुज-भ्रमण—अपने हाथ के चारों ओर तलवार घुमाना।
१५. पाश—बन्दिश लगाना।
१६. पाद—मूठ में मूठ मिलाकर बन्दिश लगाना।
१७. विबन्ध—तलवार को रोककर शत्रु को नाकाम कर देना।
१८. भूमि—खड्ग को नीचे करके पैरों पर प्रहार करना।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

गतप्रत्यागताक्षेपाः पातनोत्थानके प्लुतम्। लाघवं सौष्ठवं शोभा स्थिरत्वं दृढमुष्टिता॥ २७॥
तिर्यगूर्ध्वप्रचरणे द्वात्रिंशत् करणान्यहो। विजित्य दानवान् सङ्ख्ये हृष्टो रुद्रो बभूव ह॥ २८॥

व्याख्या—

गतं पश्चाद् गमनम्। प्रत्यागतं शत्रूद्देशेनाभिमुखगमनम्। आक्षेपो रिपुमुष्टिस्खालनम्। पातनं रिपुकराद् भूमौ खड्गन्यासनम्। उत्थानकं स्वखड्गोद्धृतिः। प्लुतं स्वस्थानप्राप्तिः। लाघवं शीघ्रप्रयोगः। सौष्ठवं खड्गधारणनैपुण्यम्। शोभा एकेनैव खड्गेन समन्ताच्चालितेन सर्वदिगवच्छेदेन झलझलायमानता। स्थिरत्वं दृढावस्थितिः। दृढमुष्टिता त्सरोर्दृढग्रहणम्॥ २७॥
तिर्यक् प्रचरणं तिर्यग् गतिः। ऊर्ध्वप्रचरणमुन्नतदेशावस्थितिः।
इति द्वात्रिंशत् खड्गवल्गितानि॥ २८॥

मानसोल्लासे खड्गचालनविधयः—

कोशात् खड्गं समाकृष्य बिलादाशीविषं यथा॥ ६३॥
चर्म वा फलकं वापि गृह्णीयाद्वामपाणिना। पाणिना भ्रामयेत्खड्गं चर्म वामेन चालयेत्॥ ७४॥
पूर्वोक्तपदसञ्चारैः सञ्चरेत विचक्षणः। शीर्षस्योपरि संस्थाप्य खड्गचर्म तथोरसि॥ ७५॥

---

१९. उद्भ्रमण—उछलकर वार मारना।
२०. गतम्—लड़ते हुए पीछे हटना।
२१. प्रत्यागतम्—शत्रु को लक्ष्य करके आगे बढ़ना।
२२. आक्षेप—शत्रु के हाथ से तलवार नीचे गिरा देना।
२४. उत्थानकम्—अपनी नीचे गिरी तलवार को विधि से उठा लेना।
२५. प्लुतम्—अपने स्थान पर आ जाना।
२६. लाघव—स्फूर्ति से प्रहार करना।
२७. सौष्ठव—खड्ग धारण में निपुणता दिखाना।
२८. शोभा—एक ही खड्ग को इस प्रकार घुमाना कि चारों ओर प्रहार होते दिखाई पड़ें।
२९. स्थिरत्वम्—अपने स्थान पर दृढ़ता से स्थित रहना।
३०. दृढमुष्टिता—खड्ग की मूठ को दृढ़ता से पकड़े रहना।
३१. तिर्यक् प्रचरंणम्—तिरछा (पैंतरा काटकर) चलना।
३२. ऊर्ध्वप्रचरणम्—शत्रु को दबाते हुए चलना।

मानसोल्लास में खड्ग चालन की विधियाँ—जैसे बिल से सर्प फुंकारता हुआ निकलता है, उसी प्रकार कोश (म्यान) से खड्ग को दाहिने हाथ से शीघ्रतापूर्वक निकाले॥ ७३॥

चर्म (ढाल) या फलक को बायें हाथ से पकड़े। दाहिने हाथ से खड्ग और बायें से चर्म को चलाए॥ ७४॥

बुद्धिमान् को चाहिए कि पूर्वोक्त (छुरी प्रकरण में कहे हुए) पैंतरों से खड्ग चर्म लेकर चले। शिर पर खड्ग और वक्षस्थल पर चर्म रखकर दाहिना पैर आगे करके शिखर स्थान को दिखलावे॥ ७५½॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणांघ्रिं पुरस्कृत्य स्थानं शिखरकं श्रयेत्। वामं हस्तं प्रसार्याग्रे चर्मणा फलकेन वा॥ ७६॥
कर्णोपान्ते समासज्य स्थानं कापोलकं भजेत्। वक्षस्यासज्य फलकं खड्गं तत्रैव बाह्यतः॥ ७७॥
परस्यान्तरमीक्षेत श्रीवत्सस्थानमाश्रितः। खड्गं महीमुखं कृत्वा खड्गाग्रं पुरतः समम्॥ ७८॥
वीक्ष्यमाणः परच्छिद्रं स्थानं भूमण्डलं भजेत्। कुक्षिदेशे त्सरुं कृत्वा फलं तिर्यक्तथोरसि॥ ७९॥
अग्रे प्रसार्य फलकं तीक्ष्णाग्रं स्थानकं न्यसेत्। कडगं चरणे विन्द्याद्दोलगं दक्षिणाङ्गजे (के)॥ ८०॥
पोगरं वामभागे स्यात्कालवल्कं तु मस्तके। आनाभिः कण्ठपर्यन्तं खड्गाग्रेण तु भेदनम्॥ ८१॥
मुनयन्नाम तत् प्रोक्तं कौक्षेयकविचक्षणैः। वारणं हननं तेषु पञ्चघातेषु पाटवम्॥ ८२॥
दर्शयेद् रचनाघातं हस्तलाघवमाचरेत्। फलके वा तथा चर्मण्यङ्गं सर्वं निगृह्य च॥ ८३॥
सञ्चरेत् परघातार्थं शून्यं पश्येत् पराङ्गकम्। पञ्चघातप्रयोगं च पञ्चघातनिवारणम्॥ ८४॥
पादलाघवसंस्थानं चालनं खड्गचर्मणा। प्रदर्श्य रञ्जयेद् राजा सर्वांश्च खुरलीगतान्॥ ८५॥

—मानसो० २।१।४

(महाभारते खड्गसञ्चालनस्य विविधा मार्गाः)

भ्रान्तमुद्भ्रान्तमाविद्धमाप्लुतं प्रसृतं सृतम्। परिवृत्तं निवृत्तञ्च खड्गं चर्म च धारयन्॥ ३८॥
सम्पातं समुदीर्णञ्च दर्शयामास पार्षतः। भारतं कौशिकं चैव सात्वतं चैव शिक्षया॥ ३९॥

(महा० द्रोण० अ० १९१)

बायां हाथ चर्मसहित आगे फैलाकर उसे कान के समीप लाकर कापोलक स्थान का प्रदर्शन करे॥ ७६½॥

छाती पर ढाल रखकर, वहीं पर बाहर की ओर से तलवार रखकर श्रीवत्स स्थान में स्थित रहता हुआ दूसरे के अन्तर (मर्मस्थल) को देखे॥ ७७½॥

खड्ग को भूमि की ओर करते हुए उसका अगला भाग भूमि के समानान्तर रखकर दूसरे के छिद्र (असुरक्षित स्थान) को देखता हुआ भूमण्डल स्थान को प्रदर्शित करे॥ ७८½॥

कुक्षिदेश (बगल) में तलवार की मूठ लाकर तलवार के अग्रभाग को छाती पर तिरछा रखकर ढाल के आगे फैलाकर तीक्ष्णाग्र स्थान पर स्थित होवे॥ ७९½॥

पैर पर किया जानेवाला खड्ग का प्रहार कड़ग, दाहिनी ओर का प्रहार दोलग, बायीं ओर किया गया पोगर, मस्तक का प्रहार कालवल्क और नाभि से कण्ठ तक खोंच मारकर भेदना मुनय, ये पाँच प्रहार खड्गशास्त्र के विद्वानों ने कहे हैं॥ ८०-८१½॥

इन पाँच आघातों को बचाना और प्रहार करना इत्यादि का प्रदर्शन राजा लाघव (फुर्ति) दिखलाता हुआ करे॥ ८२½॥

ढाल द्वारा अपने सभी अङ्गों को सुरक्षित रखता हुआ प्रतिद्वन्द्वी पर प्रहार करने के हेतु आगे बढ़े। उसके शून्य (असुरक्षित) भाग को देखे। इस प्रकार पाँच प्रहार, पाँच आघात को बचाने के उपाय, पैंतरा चाल, खड्ग और ढाल का चलाना इत्यादि का प्रदर्शन करके राजा खुरली में आये हुए व्यक्तियों का मनोरञ्जन करे॥ ८३-८४-८५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खड्ग चालन के स्थान (पवित्रे)



शिखरक



कापोलक



श्रीवत्स



तीक्ष्णाग्र



भूमण्डल

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खड्ग के विभिन्न प्रहार



कड्ग



कालवल्क

दोलग



पोगर



मुनय

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भारतभावदीपटीका—द्रोणपर्व पृष्ठ ३११

मण्डलाकारतः खड्गभ्रामणं भ्रान्तमुच्यते। तदेव बाहुमुद्यम्य कृतमुद्भ्रान्तमीरितम्॥ १॥ भ्रामणं स्वस्य परितः खड्गस्याविद्धमुच्यते। परप्रयुक्तशस्त्रस्य वारणार्थमिदं त्रयम्॥ २॥ शत्रोराक्रमणार्थाय गमनं त्वाप्लुतं मतम्। खड्गस्याग्रेण तद्देहस्पर्शनं प्रसृतं मतम्॥ ३॥ वञ्चयित्वा रिपौ शस्त्रपातनं गदितं सृतम्। परिवृत्तं भवेच्छत्रोर्वामदक्षिणभागतः॥ ४॥ पश्चात् पदापसरणं निवृत्तं सम्प्रचक्षते। अन्योन्यताडनं प्राहुः सम्पातमुभयोरपि॥ ५॥ आधिक्यमात्मनो यत् तत् समुदीर्णमुदीरितम्। अङ्गप्रत्यङ्गदेशेषु भ्रामणं भारतं स्मृतम्॥ ६॥ विचित्रखड्गसञ्चारदर्शनं कौशिकं स्मृतम्। निलीयचर्मणिक्षेपो यदसेः सात्वतं हि तत्॥ ७॥ भ्रान्तं मण्डलाकृतिः, तदेव क्लमोपेतमाविद्धं, भ्रान्तमेवोन्नति सहितमुद्भ्रान्तं, आप्लुतं केवलमुत्प्लवनं प्रसृतं सर्वासु दिक्षु प्रसरणं प्लुतमेकस्यां दिशि, सम्पातं वेगं समुदीर्णं सर्वान् प्रति समुद्यमम्। —*(महा० भीष्म० ५४/५०) (भारतभावदीप पृष्ठ १७५)*

महाभारत में खड्ग चालन की अनेक विधियाँ—

भारतभावदीप टीका में—खड्ग को गोलाई में घुमाना भ्रान्त कहा जाता है। इसी को हाथ ऊपर उठाकर घुमाना उद्भ्रान्त होता है। अपने चारों ओर खड्ग को घुमाना आविद्ध कहलाता है। इन तीनों विधियों से दूसरे के शस्त्र से अपनी रक्षा की जाती है॥ १-२॥

शत्रु पर आक्रमण करने के लिए छलांग लगाकर जाना आप्लुत माना गया है। खड्ग के अगले भाग से शत्रु के शरीर को छूना (खोंच का वार मारना) प्रसृत होता है॥ ३॥

शत्रु को धोखा देकर उसपर प्रहार करना सृत कहा गया है। शत्रु के बाँये या दाहिने भाग में प्रहार मारना परिवृत्त विज्ञान होता है॥ ४॥

पीछे की ओर पैंतरा चलकर हटना निवृत्त कहलाता है। परस्पर एक-दूसरे पर प्रहार करना सम्पात होता है॥ ५॥

अपने कौशल्य की अधिकता से दूसरे को दबा लेना समुदीर्ण कहा गया है। अङ्ग-प्रत्यङ्गों (एक बार में ही कई अङ्गों पर निरन्तर प्रहार) पर प्रकार करने के लिए तलवार घुमाना भारत कहा गया है॥ ६॥

खड्ग सञ्चालन का अद्भुत कौशल्य प्रदर्शित करना कौशिक कहलाता है। चर्म (ढाल) से अपने-आपको सुरक्षित करके असि का प्रहार करना सात्वत विज्ञान होता है॥ ७॥

मण्डल (घेरे) में तलवार को घुमाना भ्रान्त, उसी को शीघ्रता या स्फूर्ति से घुमाना आविद्ध, भ्रान्त को ही ऊँचा घुमाना उद्भ्रान्त, केवल छलाङ्ग लगाना आप्लुत, सभी दिशाओं में प्रहार करना प्रसृत, एक दिशा में उछलकर जाना प्लुत, वेग से प्रहार सम्पात और सभी से लड़ने का उद्यम करना समुदीर्ण कहलाता है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

खड्ग विज्ञान



भ्रान्त





उद्भ्रान्त



आप्लुत



सव्य दक्षिण गमन



पैतरा चलना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अष्टम अध्याय

छुरिका

युद्धक्षेत्र में छुरिका का प्रयोग देखने को नहीं मिलता। फिर भी सभी क्षत्रिय एवं उनकी स्त्रियाँ आत्मरक्षा के लिये कटिप्रदेश में छुरिका अवश्य रखते थे। इसका प्रयोग निकट युद्ध या आकस्मिक विपत्ति से सुरक्षा करने के लिये किया जाता है।

नीतिप्रकाशिका में छुरी का मान १ हाथ दिया है। इसकी चौड़ाई २ अङ्गुल और तीन किनारे होते हैं। कमर प्रदेश में मेखला (पेटी) बाँधकर उसमें इसे लटकाते हैं। 'अपराजितपृच्छा' में छुरिका का मान ६ से १२ अङ्गुल दिया है। इसका दण्ड भैंस के सींग का बना हुआ, जौ के समान (मध्य में स्थूल) और उसमें कीलें लगी हुई होती हैं।

'मानसोल्लास' के शस्त्रविनोदप्रकरण में सर्वप्रथम छुरिका-विनोद ही दिया है। इसके अनुसार राजा समुचित शृङ्गार, भुजा, मस्तक पर तिलक लगाये तथा हाथ एवं कानों में आभूषण धारण करके घुटनों तक आनेवाला कच्छा पहने। इसके पश्चात् रङ्गभूमि (अखाड़े) में जाकर दूसरे छुरीयुद्ध के ज्ञाता व्यक्ति को बुलाकर विविध प्रहार, पवित्रे एवं उनको रोकने की विधियों का प्रदर्शन करे। इनका सचित्र वर्णन आगे किया जाता है।

छुरिकाया लक्षणम्

नीतिप्रकाशिकायाम्—

असिधेनुः समाख्याता हस्त्योन्नत्या प्रमाणतः। अतलभत्सरुयुक्ता श्यामा कोटित्रयाशिता॥ १५॥
अङ्गुलिद्वयविस्तारा ह्यासन्नरिपुघातिनी। [1]मेखला ग्रन्थिनी सा तु प्रोच्यते खड्गपुत्रिका॥ १६॥
मुष्ट्याग्रे ग्रहणं चैव पातनं कुण्ठनं तथा। वल्गितत्रयवत्येषा सदा धार्यानृपोत्तमैः॥ १७॥

—नीतिप्र० अ० ५

अपराजितपृच्छायाम्—

छुरिकालक्षणं वक्ष्ये यदुक्तं परमेश्वरैः। कौमारी चैव लक्ष्मीश्च शंखिनी तुन्दका तथा॥ १७॥

छुरी का लक्षण

नीतिप्रकाशिका में—एक हाथ लम्बी, बिना हाथ के बचाने की डण्डी की मूठवाली, श्याम रङ्ग की, तीन धारवाली, दो अङ्गुल चौड़ी, समीप के शत्रु पर वार करनेवाली मेखला (कमर) से लटकी हुई खड्ग की पुत्री या असिधेनु (छुरी) कहाती है॥ १५-१६॥

इसकी मुट्ठी में पकड़ना, पाटन (घोंपना) कुण्ठन (घोंपकर तिरछा करके निकालना) ये तीन गतियाँ हैं। यह श्रेष्ठ राजाओं को सदा धारण करनी चाहिये॥ १७॥

—धनुर्वेदः पं० जयदेव शर्मा, पृष्ठ ५४

अपराजितपृच्छा में छुरी का मान—जैसा शिवजी महाराज ने कहा वैसा छुरी का मान

---

१. महिषविषाणघटितमुष्टिकटारकोत्कटकटिभागम्। (भैंस के सींग से बनी हुई मूठवाली छुरियाँ जिनके उत्कट कटिभाग में सुशोभित हो रही हैं।)
—यशस्तिलकचम्पूकाव्ये, पृष्ठ० ३१२

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पापिनी शुभगा लक्षा षडङ्गुलादिकोद्भवा। द्वादशान्तिमाङ्गुलान्यङ्गुलमानं प्रशस्यते॥ १८॥
आदिहीना मतिभ्रंशं मध्यहीना धनक्षयम्। हन्याद् वंशहीना शूलाग्रे मृत्युसम्भवः॥ १९॥
चतुरङ्गुला भवेन्मुष्टिरूर्ध्वे द्व्यङ्गुलताडिता। मुष्टिकाऽधो यवाकारो जडनार्थे च कीलकम्॥ २०॥

—अपरा० अ० २३५, पृष्ठ ५९८

मानसोल्लासे—

वितस्तिमात्रिकाहीनं मध्यमं विहिनस्ति च। स्थापयित्वोत्तमां शस्त्रीं गृह्णीयाच्छिक्षया नृपः॥ १६॥
अङ्गुष्ठपर्वमानेन माननीयासिधेनुका। मुष्टिभागं परित्यज्य गणयेद् वंशपृष्ठतः॥ १७॥
आयुर्लक्ष्मीमृतिश्चेति समुच्चार्य पुनः पुनः। आयुर्लक्ष्मीपदे शस्ता वर्ज्या मृत्युपदे स्थिता॥ १८॥
तीक्ष्णधारा दृढा लघ्वी तिर्यग्रेखा विवर्जिता। अभिन्नधारा नात्युच्चैर्नीच्चैस्तिष्ठेत्स सौष्ठवम्॥ १९॥
वामं पादं तथा सव्यं प्रसृतं बाहुदण्डकम्। पुरस्कृत्यावतिष्ठेत सङ्क्रामेच्च परं प्रति॥ २०॥
समुष्टिकं बाहुदण्डं दक्षिणं क्षुरिकान्वितम्। शिरः समं समुत्क्षिप्य भैरवं स्थानमाचरेत्॥ २१॥

एवं लक्षण कहता हूँ। कुमारी, लक्ष्मी, शङ्खिनी, तुन्दका, पापिनी, शुभगा और लक्षा ये सात प्रकार की छुरियाँ होती हैं। इनमें क्रम से कुमारी छह अङ्गुल लम्बी, लक्ष्मी सात, शङ्खिनी आठ, तुन्दका नौ, पापिनी दस, शुभगा ग्यारह और लक्षा बारह अङ्गुल मान की होती है॥ १७-१८॥

प्रारम्भ में हीन (टूटी हुई या विकारयुक्त) बुद्धि की नाशक, मध्य में त्रुटित धन की नाशक, वंश (मूठ) में दोषयुक्त कुल की संहारक और शूलाग्रफल के अगले भाग में दोषयुक्त छुरी मारक होती है॥ १९॥

छुरी की मुष्टि (मूठ) चार अङ्गुल लम्बी और दो अङ्गुल मोटी होती है। मूठ का निचला भाग जौ की आकृति के जैसा (मध्य में कुछ मोटा और किनारों में पतला) होता है एवं जड़ने के लिये कील लगी हुई होती है॥ २०॥

मानसोल्लास में छुरी का मान—मात्रिका (एक अङ्गुल) कम एक वितस्ति (बालिस्त) लम्बाईवाली छुरी मध्यम एवं प्रहार करने में समर्थ होती है। ऐसी उत्तम छुरी को राजा युक्तिपूर्वक धारण करे॥ १६॥

छुरी का माप मुष्टि (मूठ) को छोड़कर शेषभाग अंगूठे के पोरवों से करना चाहिये। अंगूठे के तीनों पर्व (पोरवों) को क्रमशः आयु, लक्ष्मी और मृत्यु नाम से उच्चारण करके छुरी का माप करना चाहिये। इसमें आयु और लक्ष्मी (प्रथम दो पर्वों) के माप से समाप्त होनेवाली छुरी प्रशस्त मानी जाती है और मृत्यु (अन्तिम पर्व) पर समाप्त होनेवाली वर्जनीय है॥ १७-१८॥

तेज धारवाली, दृढ, छोटी, तिरछी—रेखाओं से रहित, समानधार, न कहीं पर स्थूलधार और न ही सूक्ष्मधारवाली छुरी उत्तम होती है॥ १९॥

मानसोल्लास में छुरी सञ्चालन—बायाँ पैर आगे करके, बायें भुजदण्ड को फैलाकर आगे करके स्थित हो और दूसरे की ओर आगे बढ़े॥ २०॥ दाहिने हाथ में छुरी पकड़कर इसी स्थिति में उसे सिर के समान ऊँचा उठाकर विपक्षी पर प्रहार करे। इसे भैरवस्थान नामक पैंतरा कहते हैं॥ २१॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दक्षिणं क्षुरिकाहस्तमपसार्य च पृष्ठतः। वामदण्डं प्रसार्याग्रे पल्लीवालं प्रदर्शयेत्॥ २२॥
क्षुरिकाग्रे तथा दण्डं प्रसार्य पुरतः समम्। पुरतो नम्रगात्रस्तु शुनकस्थानकं न्यसेत्॥ २३॥
प्रसार्य दक्षिणं बाहुमसिधेनुमधोमुखीम्। उरसि न्यस्तदण्डस्तु स्थानकं नूकमाचरेत्॥ २४॥
क्षुरिकाग्रं समुन्नम्य नीचे तु मणिबन्धने। दण्डं चोरसि संस्थाप्य विनूकं स्थानमाश्रयेत्॥ २५॥
वामे भागे सशस्त्रीकं करं सन्न्यस्य कम्पयन्। दण्डवत्सन्न्यसेद्दण्डं लुलितं स्थानकं भजेत्॥ २६॥
क्षुरिकाग्रं प्रसार्याग्रे दण्डं संकोच्य वक्षसि। नहयं स्थानकं कुर्याद् भूपः सौष्ठवसंयुतम्॥ २७॥
असिधेनुमुरौ देशे कृत्वा दण्डं तदग्रतः। नट्टेकं नाम संस्थानं कुर्यात् स रञ्जयन्सताम्॥ २८॥
जानुनोर्मध्यभागे तु शस्त्र्यग्रेण स्पृशन् भुवम्। वामं प्रसार्य दोर्दण्डं स्थानं रोपितकं चरेत्॥ २९॥
दण्डकस्य शिरस्थाने सासिधेनुं करं दधत्। वामदण्डं क्षिपन्नग्रे स्थानं पोत्ताङ्गुलं भजेत्॥ ३०॥
उत्क्षिप्य दक्षिणं बाहुं सासिधेनुं मृगारिवत्। दण्डं नीचं तथा कृत्वा स्थानं व्याघ्रनखं श्रयेत्॥ ३१॥
वामदण्डस्थलस्याधः कुर्वन् मूर्वीं स शस्त्रिकाम्। दक्षिणे च स्तने दण्डं भजेदर्धकपोलके॥ ३२॥

दाहिने छुरीवाले हाथ को पीछे और बायें हाथ को आगे करके पल्लीवाल स्थान को दिखाये॥ २२॥

इसी प्रकार छुरी के आगे सम (बराबरवाला बायाँ) हाथ सामने फैलाकर अपने शरीर को आगे बढ़ाकर झुकाये। इसे शुनकस्थान कहते हैं॥ २३॥

दाहिने हाथ को फैलाकर छुरी का मुख नीचे की ओर करे। बायाँ हाथ छाती पर रखकर नूकस्थान को करे॥ २४॥

छुरी का अग्रभाग (मुख) ऊपर की ओर करके दाहिने हाथ की कलाई नीचे करे। बायाँ हाथ पूर्ववत् वक्षस्थल (छाती) पर रखकर विनूक स्थान को दिखाये॥ २५॥

छुरीसहित दाहिने हाथ को चलाता हुआ अपनी बायीं ओर ले जाये। (छुरी भूमि के समानान्तर रहेगी) बायाँ हाथ दण्ड के समान सीधा रखकर लुलितस्थान को प्रदर्शित करे॥ २६॥

छुरिका के अगले भाग को आगे करके हाथ को छाती के पास लेकर दीखने में सुन्दर नहयस्थान को राजा दिखलाये॥ २७॥

छुरी को छाती के पास लाकर हाथ को उसके आगे करके सज्जनों को आनन्दित करता हुआ नट्टेकस्थान का प्रदर्शन करे॥ २८॥

दोनों घुटनों के मध्य से छुरी के अग्रभाग से भूमि को छूते हुए तथा बायाँ हाथ फैलाकर रोपितकस्थान को दिखाये॥ २९॥

शिर के ऊपर छुरीसहित दाहिने हाथ को लाकर बायाँ हाथ आगे फेंकते हुए पोत्ताङ्गुलस्थान को दिखलावे॥ ३०॥

दाहिनी भुजा को ऊपर उठाकर सिंह की भाँति झटके से प्रहार करते हुए नीचे लाकर व्याघ्रनख पैंतरे का प्रदर्शन करे॥ ३१॥

बायें हाथ के नीचे (कक्षा में) छुरीसहित दाहिने हाथ की मुट्ठी को रखे। दाहिने हाथ की कुहनी दाहिने स्तन के पास रहेगी इस प्रकार करता हुआ अर्धकपोलक दाव को करे॥ ३२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छुरिका के विज्ञान



भैरव



पल्लीवाल



शुनक



विनूक



लुलित

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

छुरिका के विज्ञान



नूक



रोपितकम्



विनूक



नहयम्



व्याघ्रनख



अर्धकपोलक

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

वामं पुरः स्थितं पादं दक्षिणेन स्पृशेन्ननु। वामं पुनः क्षिपेदग्रे दक्षिणेन पुनः स्पृशेत्॥ ३३॥
तथैवोपन्यसेत् पादं दक्षिणं चरणेन तु। गतागतैर्विनिर्गच्छन् पदग्राहं समाचरेत्॥ ३४॥
पुरः स्थितेन पादेन पाश्चात्यं घट्टयेत् पुनः। तदेवाग्रे क्षिपन्गाच्छन् पदप्राप्तिं गतिं भवेत्॥ ३५॥
न्यस्तौ च पादावुत्क्षिप्य प्रसर्पंश्च शनैः शनैः। अनुक्षेपगतिं कुर्यात् सर्पणेन विसर्पणः॥ ३६॥
पादयोर्हतसञ्चारैरीषदुत्क्षेपलक्षणैः। सर्पणं सर्पवत् कुर्यात् सर्पिकां गतिमाचरेत्॥ ३७॥
आकुञ्चितैस्तथा पादैर्लीलाचङ्क्रमणाञ्चितैः। मत्तवारणवद् गच्छेन्मत्तेभगतिमाचरेत्॥ ३८॥
जिघृक्षया द्रुतं गत्वा यदुत्प्लुत्यापसर्पति। तां गतिं वायसीं बिभ्रद्विचरेच्छस्त्र कोविदः॥ ३९॥
आकुञ्चिताभ्यां पादाभ्यामङ्गुल्यग्रैः स्पृशन्महीम्। बाकोटीं गतिमास्थाय सञ्चरेत्क्षुरिकाकरः॥ ४०॥
गात्रसंकोचनं कृत्वा सिंहवल्लङ्घयन्भुवम्। पञ्चाननगतिं कुर्वन्दर्शयेत् पाणिलाघवम्॥ ४१॥
किञ्चिदाकुञ्चयन्शस्त्रीं किञ्चिदालोलयन्भुजम्। आवर्तैः परिवर्तैश्च तथा सव्यापसव्यकैः॥ ४२॥

पैरों का सञ्चालन (पैंतरे से आगे-पीछे चलना)—आगे रखे हुए बायें पैर को पीछे रखे हुए दाहिने पैर को आगे बढ़ाकर उसका स्पर्श करे। इसके पश्चात् बायाँ पैर पुनः आगे रखकर दाहिने पैर को बढ़ाये और उससे बायें पैर को छूयें। इसी प्रकार दाहिने पैर को आगे रखते हुए चले। जैसे आगे जाये उसी प्रकार पीछे आना चाहिये, इसे पदग्राह कहते हैं॥ ३३-३४॥

इसके पश्चात् आगे रखे हुए दाहिने पैर से पीछे के बायें पैर को ठोकर मारकर चलायें। इसी प्रकार पीछे के पैर को आगेवाले पैर से चलाते हुए पीछे जाना पदप्राप्ति गति कहलाती है॥ ३५॥

स्थिर पैरों को ऊपर उठाकर धीरे-धीरे आगे बढ़े, इसी भाँति सर्पण (आगे जाना), विसर्पण (पीछे आना) क्रिया को करता हुआ अनुक्षेप गति का अभ्यास करे॥ ३६॥

कुछ उछलते हुए (झटके से) पैरों को भूमि पर सर्प के समान सञ्चरित करता हुआ सर्पिका गति (दायें-बायें, तिरछा सर्पवत् जाना) से चलें॥ ३७॥

पैरों को कुछ झुकाकर लीलापूर्वक क्रमशः रखता हुआ मस्त हाथी की भाँति चलता हुआ मत्तेभ गति से चलें॥ ३८॥

किसी वस्तु को लेने की इच्छा से जैसे कव्वा उछल-उछलकर जाता है फिर एक बार ही झपटकर वस्तु को उठा लेता है, उसी प्रकार शस्त्रज्ञान में निपुण वायसी गति का अभ्यास करें॥ ३९॥

कुछ झुके हुए पैरों की अङ्गुलियों के अग्रभाग से भूमि को छूता हुआ छुरी हाथ में लेकर बाकोटी गति से चले॥ ४०॥

शरीर को सिकोड़कर सिंह के समान छलाङ्ग लगाता हुआ पञ्चानन गति से चलता हुआ हाथ का चातुर्य दिखलाये॥ ४१॥

छुरी को कुछ अपने पास लाकर और भुजा को कुछ घुमाते हुए आवर्त-परिवर्त (चारों ओर पैंतरे से चलना) और दायें-बायें पैंतरे से जाने का अभ्यास करते हुए छुरी को ऊपर, पीछे,

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



पदग्राह आगे जाना



पदप्राप्ति पीछे आना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भ्रामयेत् क्षुरिकामूर्ध्वं पृष्ठे पादे तथाग्रतः। कक्षयोः कण्ठदेशे च पादसञ्चारसंयुतः॥ ४३॥
विद्युत्पञ्जरमध्यस्थमिवात्मानं प्रदर्शयेत्। चारणे धारणे चैव धारणे मारणे तथा॥ ४४॥
अमोघां दर्शयेदाशां दुर्निवारो भयंङ्करः। शस्त्रीं प्रदर्शयेदेवं दुष्टाशयविभीषणीम्॥ ४५॥

—मानसोल्लास भाग २, अ० १, विं० ४

पैर में (नीचे) आगे, पार्श्वभाग (बग़ल) और कण्ठ इत्यादि स्थानों पर प्रहार पैंतरेसहित करे॥ ४२-४३॥

छुरी को चलाना, वारों को रोकना, वारों को रोककर पुनः विपक्षी पर प्रहार करना इत्यादि का शीघ्रतापूर्वक सञ्चालन करें, जिस प्रकार विद्युत् पञ्जर (पिंजरा) में चारों ओर प्रतिभासित होती है उसी प्रकार चारों ओर राजा प्रहार करता दिखलाई दे। इन अमोघ वारों का प्रदर्शन राजा अपनी श्रेष्ठता दिखाये। इन प्रहारों को रोकना बहुत ही कठिन है, ऐसा प्रदर्शन दुष्टों को भयदायक छुरी द्वारा करे॥ ४४-४५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नवम अध्याय

गदा

यह प्रहार का पुरातन आयुध है। भीम, दुर्योधन का गदायुद्ध तो सुप्रसिद्ध है ही। हनुमान् के हाथ में भी गदा सुशोभित है। विष्णु की प्रतिमा में भी गदा चित्रित है। औशनस धनुर्वेद में गदाविज्ञान को बतलानेवाले 'प्रपौत्रशास्त्र' का उल्लेख किया है जो अब अनुपलब्ध है। गदा का भार एक सहस्रपल, आठ सौ पल और छह सौ पल उत्तम, मध्यम, अधम के भेद से होता है।

इसकी संहारशक्ति बढ़ाने के लिये अग्रभाग में लोहे की कीलें लगा देते थे। रामायण में भी ऐसी गदा का वर्णन आया है। गान्धार शैली की प्रतिमाओं में भी शंकुचित्रित गदा देखी जाती है। बम्बई संग्रहालय में भी लोहे की कीलें लगी हुई गदा विद्यमान है।

नीतिप्रकाशिका में गदा का मान चार हाथ दिया है। मानसोल्लास में इसकी लम्बाई ५० अङ्गुल कही है। गदा का निर्माण सुदृढ़ काष्ठ या लोहे से किया जाता है। अग्रभाग स्थूल, ८ या १६ कलियों से युक्त और सबसे ऊपर कलश जैसा बनाया जाता है। इसको त्रिकोण या चार कोनोवाली भी कहा है।

अग्निपुराण में गत-प्रत्यागत आदि २० मण्डल (पैंतरे) गदायुद्ध के दिये हैं। इसी भाँति महाभारत में १७ विज्ञान नीलकण्ठ शास्त्री ने भारतभावदीप टीका में उद्धृत किये हैं। मानसोल्लास में भी गदा का वर्णन किया है।

मध्यकाल के आयुधों में गदा का समावेश प्रायः नहीं है। इसमें यही कारण है कि योद्धा लोगों का बल क्षीण हो गया। अथवा हाथी के मस्तक पर प्रहार करने के लिये इसका प्रयोग किया जाता था और हाथी द्वारा युद्ध करने का भी मध्यकाल में प्रचलन कम हो गया था।

गदा

औशनसधनुर्वेदे—

जमदग्निं प्रति शुक्र उवाच। गदा लक्षणं वक्ष्यते, समाहितो निबोध। तत्र गदा पञ्चाशदङ्गुलायामा श्रेष्ठा, चत्वारिंशदङ्गुलायामा मध्यमा, त्रिंशदङ्गुलायामा निकृष्टा भवेदिति त्रिविधा गदा बुधैरुपदिष्टा। पलानां सहस्रमुत्तमायाः शतान्यष्टौ मध्यमायाः षट्शतानि कनिष्ठाया इति गदायाः त्रिविधं गौरवं भवति। सैव लक्षणलक्षिता गदा प्रपौत्रशास्त्रतो

औशनस धनुर्वेद में—जमदग्नि से शुक्राचार्य कहने लगे, अब गदा का लक्षण कहते हैं, सावधान होकर समझो।

पचास अङ्गुल लम्बी गदा उत्तम होती है। चालीस की मध्यम और तीसवाली अधम होती है। ये तीन प्रकार की गदा विद्वानों ने कही हैं। सहस्र पलभार की गदा उत्तम, ८०० पल की मध्यम और ६०० पल की अधम गदा होती है। इन लक्षणों से युक्त गदा "प्रपोत्रशास्त्र" के अनुसार लेनी चाहिये। जो बल का दर्प (घमण्ड) रखता हो, इस गदा का भार सहने में समर्थ

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

ग्रहीतव्या। यस्तु बलदर्पितः समर्थगोरवो देवदेववराधिष्ठितः स तां गृह्णाति। तस्य मुक्तस्य च दोषाः संभवेयुः। तथा या गदा लघीयसी भवति न सा संग्रामे युद्धविशारदैः प्रशस्यते। तस्मात् समा सर्वेषां प्रशस्ता भवति। या हि प्रतीचारे प्रहारे चारिकासु च सञ्चारमोक्षा समेत्यभिधीयते। त्र्यस्रा वृत्ताश्रिर्वा सुगात्रा व्रणरहिता सुविहिता प्रियदर्शना कर्तव्या। ग्रहो दशाङ्गुलायामो दशाङ्गुल परिणाहश्च त्रयाणां पुरुषाणाम्। मूलतः सुद्रव्यानि पद्मगर्भोपमं पूर्णचन्द्रोपमं वा ग्रहमूलं चित्रज्ञैश्चित्रितं भवति। स्थूलाग्रा विशिष्टा चतुरस्रा मध्यमा तालमूलाकृतिर्निकृष्टा भवति। तप्तकाञ्चनपदैर्रजतपदैर्वा बहुचित्रितरूपैर्मूलमध्याग्रबन्धनैर्विचित्रीकृता गदा श्रेष्ठा भवति सर्वशास्त्रेषु। सा हि क्रियाविधौ वपुष्मत्त्वाद् बलवत्वाच्च सुखयोगा भवति। नाना-चित्रैरलङ्कृता सर्वेभ्यः शस्त्रेभ्यश्चाक्षय्या। सा हि गदा शस्त्रज्ञैरायुधवरेत्यभिधीयते।

राजविजये—

पञ्चाशदङ्गुलो दण्डो दलेष्वर्काङ्गुला गदा। दलानि षोडशैव स्युः कलशोऽङ्गुलिमात्रकः॥

—वीर० मित्रो० लक्षणप्रकाशे नानायुधलक्षणम् पृष्ठ ३१५

शुक्रनीतौ—

अष्टास्रा पृथुबुध्ना तु गदा हृदयसम्मिता। *—अ० ४-१०४६*

हो और देवताओं (गदायुद्ध के ज्ञाता) की जिसपर कृपा हो वह उसको ग्रहण करे। इस गदा को इसके विशेषज्ञों की उपस्थिति के बिना चलाने से हानि सम्भव है। जो गदा छोटी होती है, संग्राम में युद्ध के जाननेवालों ने उसे अच्छा नहीं माना। जो प्रतीचार (दूसरे के प्रहार को रोकना), प्रहार (स्वयं वार करना) और चारिकाओं (विभिन्न पवित्रों से घुमाना) इत्यादि दावों से छोड़ी जाती है, उसे समा कहते हैं। तीन कोणोंवाली, गोलाकार, अच्छे अङ्गोंवाली, व्रणरहित, अच्छी प्रकार बनाई हुई, देखने में सुन्दर गदा बनानी चाहिये। ग्रह (मूठ) दस अङ्गुल लम्बी और घेरे में भी दस अङ्गुल तीनों (उत्तम, मध्यम, अधम) गदाओं की होनी चाहिये। इसका मूलभाग सुन्दर पदार्थों, बिना खिले हुए कमल के सदृश, पूर्ण चन्द्र के समान गोल और चित्रकारी से युक्त होना चाहिये।

जिसका अगला भाग स्थूल (भारी) हो वह गदा उत्तम, चार कोणोंवाली मध्यम और ताल वृक्ष के मूलवाली गदा निकृष्ट होती है। जिस गदा का मूल, मध्यम और अग्रभाग स्वर्ण या चाँदी की पच्चीकारी युक्त हो उसे सब शास्त्रों में श्रेष्ठ कहा है, क्योंकि वह भारी होने और सुदृढ़ होने से चलाने में सुविधापूर्वक चलाई जा सकती है। अनेक प्रकार की चित्रकारी से सुशोभित वह गदा अन्य सभी शस्त्रों से अदम्य है। शस्त्रों के ज्ञाता विद्वान् इस गदा को श्रेष्ठ आयुध बतलाते हैं।

राजविजय में गदा का लक्षण—गदा का दण्ड पचास अङ्गुल लम्बा होना उचित है। गदा के दल (कोने) एक-एक अङ्गुल मोटे और संख्या में सोलह होते हैं। कलश (गदा का उपरिभाग जैसे मन्दिरों में कलश होता है) एक अङ्गुल का ही होना चाहिये।

शुक्रनीति में गदा का लक्षण—आठ कोणोंवाली, मोटे हत्थे की और छाती के बराबर गदा होती है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रस्तर प्रतिमाओं में अस्त्र-शस्त्र

१. खड्ग, गदा, चक्र, धनुष



२. हल मूसल



३. परशु



४. गदा



५. परशुधारी परशुराम

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मानसोल्लासे—

गदां लोहमयीं कुर्याद् दारुसारमयीं तथा। घनेन निर्मितां वापि रत्नकाञ्चनभूषिताम्॥ १८९॥
स्थूलोदरीं च स्थूलाग्रां समदन्तां परां शुभाम्। प्रगृह्य मूलदेशे तु खड्गवद् दृढमुष्टिना॥ १९०॥
भ्रामयेत् करयुग्मेन करेणैकेन वा पुनः। विचरेन्मण्डलैश्चित्रैः सव्यैश्चापसव्यकैः॥ १९१॥
गतागतैश्च गोमूत्रैरुपप्लवन्नुत्प्लुतैरपि। पातयन् परघातांश्च प्रहाराशाश्च दर्शयेत्॥ १९२॥
उपन्यस्तैरपन्यस्तैरावर्तपरिवर्तनैः। दर्शयेत् तु गदाविद्यां विनोदाय महीपतिः॥ १९३॥

—मानसो० भाग २, अ० १, विंशतिः ४

नीतिप्रकाशिकायाम्—

गदा शैक्यायसमयी शतारपृथुशीर्षका। [1]शङ्कुप्रावरणा घोरा [2]चतुर्हस्तसमुन्नता॥ २९॥
रथाक्षमात्रकाया च किरीटाञ्चितमस्तका। सुवर्णमेखला गुप्ता गजपर्वतभेदिनी॥ ३०॥
मण्डलानि विचित्राणि गतप्रत्यागतानि च। अस्त्रयन्त्राणि चित्राणि स्थानानि विविधानि च॥ ३१॥
परिमोक्षं प्रहरणं वर्जनं परिधावनम्। अभिद्रावणमाक्षेपं अवस्थानं सविग्रहम्॥ ३२॥
परावृत्तं सन्निवृत्तमवप्लुतमुपप्लुतम्। दक्षिणं मण्डलं चैव सव्यं मण्डलमेव च॥ ३३॥
आविद्धञ्च प्रविद्धञ्च स्फोटनं ज्वालनं तथा। उपन्यस्तमपन्यस्तं गदामार्गाश्च विंशतिः॥ ३४॥

—नीति० प्र० अ० ५

मानसोल्लास में—लौह, दारुसार (पक्की लकड़ी) अथवा घन (इस्पात) इन द्रव्यों से गदा का निर्माण करे जोकि स्वर्ण एवं रत्न आदि से सुभूषित हो॥ १८९॥

गदा का उदर (मध्यभाग) मोटा और अग्रभाग भी मोटा, एवं जिसके दन्त (कोने) समान (छह, आठ, सोलह) हों, ऐसी सुन्दर गदा को मूल से तलवार के समान दृढ़ मुष्टि से पकड़े॥ १९०॥

एक हाथ अथवा दोनों हाथों से पकड़कर गदा को घुमावे। गदा के पवित्रे, सव्य, अपसव्य, गत, प्रत्यागतादि पैंतरों का राजा विनोद के लिये प्रदर्शन करे॥ १९१-१९३॥

नीतिप्रकाशिका में—गदा वज्रसार या लोहे की सैकड़ों (बहुत-से) अरों युक्त मोटे शिरवाली, शङ्कु (कीलों से युक्त) भयङ्कर चार हाथ लम्बी, रथ के धुरे के समान मोटी, मस्तक पर मुकुटवाली, सोने की मेखला से मंढी हुई, हाथी और पर्वतों का भी भेदन करनेवाली होती है॥ २९-३०॥

इसके मण्डल, पैंतरे विविध प्रकार के हैं जैसे—गत (आगे बढ़ना) प्रत्यागत (पीछे हटना), अस्त्र-यन्त्र (मर्मस्थल पर प्रहार करना), अनेक पैंतरों से चलना, गदा को घुमाना, प्रहार मारना, शत्रु के प्रहार को अपनी गदा से रोकना, चारों ओर दौड़ना, प्रतिपक्षी की ओर दौड़कर जाना, उछलकर वार करना, स्थिर रहना, पुनः उठकर शत्रु से युद्ध करना, पीछे लौटना, शत्रु के निकट जाना, उलटी छलाङ्ग मारना, कूदकर जाना, दायें-बायें पैंतरों को चलना, आविद्ध, प्रविद्ध, स्फोटन, ज्वालन, अपन्यस्त, उपन्यस्तादि गदा के बीस पैंतरे हैं॥ ३१-३२-३३-३४॥

---

१. (क) कौटिल्यार्थशास्त्रे कंटकयुक्ता गदा स्पृक्तलेत्युक्ता। अस्या गणना चलयन्त्रेषु कृतेति चिन्त्यम्।
(कौ० आयुधागाराध्यक्षप्रकरणम्)

(ख) तस्य क्रुद्धस्य रोषेण गदां तां बहुकण्टकाम्। पातयामास धूम्राक्षो मस्तकेऽथ हनूमतः॥
—रामा० युद्ध० ५२/३४

२. शैक्यां तात चतुष्किष्कुं षडस्रामितोजसाम्। *—महा० उद्योगपर्व ५१/२८*
अत्रापि चतुष्किष्कुशब्देन चतुर्हस्त एव गदामानमङ्गीकृतम्।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अग्निपुराणे—

सत्यागमावदंशश्च वराहोद्धूतकं तथा। हस्तावहस्तमालीनमेकहस्तावहस्तके ॥ १९ ॥
द्विहस्तबाहुपाशे च कटिरेचितकोद्गते। उरोललाटघाते च भुजाविद्धाधमान्तथा ॥ २० ॥
करोद्धूतं विमानञ्च पादाहतं विपादिकम्। गात्रसंश्लेषणं शान्तं तथा गात्रविपर्ययः ॥ २१ ॥
ऊर्ध्वप्रहारं घातञ्च गोमूत्रं सव्यदक्षिणे। पारकं तारकं दण्डं करवीरान्धमाकुलम् ॥ २२ ॥
तिर्यग् बन्धमपामार्गं भीमवेगं सुदर्शनम्। सिंहाक्रान्तं गजाक्रान्तं गर्दभाक्रान्तमेव च ॥ २३ ॥
गदा कर्माणि जानीयात्....... *—अग्नि पु० अ० २५२*

महाभारते—

मण्डलानि विचित्राणि गतप्रत्यागतानि च ॥ १७ ॥
अस्त्रयन्त्राणि चित्राणि स्थानानि विविधानि च। परिमोक्षं प्रहाराणां वर्जनं परिधावनम् ॥ १८ ॥
अभिद्रवणमाक्षेपमवस्थानं सविग्रहम्। परिवर्तनं संवर्तमवप्लुतमुपप्लुतम् ॥ १९ ॥
उपन्यस्तमपन्यस्तं गदायुद्धविशारदौ ॥ २० ॥ *—महा० शल्यपर्व अ० ५७*
गदाहस्तौ ततस्तौ तु मण्डलावस्थितौ बली। दक्षिणं मण्डलं राजन् धार्तराष्ट्रोऽभ्यवर्तत ॥ २५ ॥
सव्यं तु मण्डलं तत्र भीमसेनोऽभ्यवर्तत।
(तत्रैव भीमदुर्योधनयोर्गदायुद्धवर्णनम्)

एतेषामुपरि भारतभावदीपटीका—पृष्ठ १०७

(१) **मण्डलानि—शत्रोः परिवेष्टनानि परितो भ्रमणानि।**
(२) **गतम्—शत्रोः सम्मुखगमनम्।**
(३) **प्रत्यागतम्—आभिमुख्यमत्यजत एवापसरणम्।**
(४) **अस्त्रयन्त्राणि—कंचिन्मर्मदेशमाक्षिप्य येन शत्रोरुत्क्षेपणमपक्षेपणं च क्रियते तदस्त्रयन्त्रम्। अस्यते क्षिप्यते अनेनेत्यस्त्रं तच्च तद्यन्त्रं निग्रहणं चास्त्रयन्त्रमिति समासः।**
(५) **स्थानानि—तेषामेवोपयोगीनि मर्मदेशादीनि।**

भारतभावदीपटीका में आये गदायुद्ध के दावों का वर्णन—

१. मण्डल—शत्रु को घेरने के लिये चारों ओर पैंतरा चलना।
२. गत—शत्रु के सामने जाना।
३. प्रत्यागत—शत्रु के सामने से न हटते हुए ही पैंतरा चलकर पीछे जाना।
४. अस्त्रयन्त्र—अपनी गदा का प्रहार शत्रु के किसी मर्मस्थल को देखकर जब किया जाये और शत्रु ऊपर उछले या प्रहार से आहत होकर नीचे बैठ जाय उसे अस्त्रयन्त्र दाव कहते हैं। जिससे फेंका जाय उसे अस्त्र और जिससे शत्रु को वश में किया जाय उसे यन्त्र कहते हैं, इन दोनों का समास अस्त्रयन्त्र होता है।
५. उन अस्त्रयन्त्र इत्यादि दावों के उपयोगी अन्य मर्मस्थानों में प्रहार करने के दाव।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(६) परिधावनम्—वेगेन सव्यापसव्यकरणम्।
(७) अभिद्रवणम्—वेगेनाभ्यगमनम्।
(८) आक्षेपम्—परयत्नस्य तत्पातनहेतुता सम्पादनम्।
(९) अवस्थानम्—अचाञ्चल्यम्।
(१०) अविग्रहम्—शत्रावुत्थिते पुनस्तेन सहयुद्धकरणम्।
(११) परिवर्तनम्—शत्रुं प्रहर्तुं परितः प्रसरणम्।
(१२) संवर्तम्—शत्रुप्रसरस्यावरोधनम्।
(१३) अवप्लुतम्—प्रहारवञ्चनार्थं नम्रीभूय निस्सरणम्।
(१४) उपप्लुतम्—तदेवार्वागगमनयुक्तम्।
(१५) उपन्यस्तम्—उपेत्यायुधप्रक्षेपः।
(१६) अपन्यस्तम्—परावृत्य पृष्ठतः कृतेन हस्तेन शत्रोस्ताडनम्॥
(१७) कौशिकान्—कुश उन्मत्तस्तदाचरितान् वञ्चयित्वा प्रहरणम्।

गदा के समान ही दण्ड, परिघ और मुद्‌गर आदि का प्रहार किया जाता है। शक्ति-क्षीणता के कारण ही गदा के स्थान पर दण्ड (लाठी) का प्रचलन हुआ। इसके सञ्चालन की विधि भी गदा से मिलती है। इसलिये आगे दण्ड का वर्णन किया जायेगा।

दण्ड

यह मानव का आदि शस्त्र है। सभी स्थानों में सुलभ होने से सर्वत्र इसका प्रयोग देखा जाता है। सर्वप्रथम अथर्ववेद में सर्पादि को दण्ड से मारना तथा आघात की औषध करना—इनका सङ्केत दिया है।[१]

---

६. परिधावन—वेगपूर्वक दायें बायें जाना।
७. अभिद्रवण—वेगसहित शत्रु के सामने जाना।
८. आक्षेप—दूसरे के द्वारा किये हुए प्रहार को व्यर्थ (काटना) करने का प्रयत्न करना।
९. अवस्थान—स्थिर होकर लड़ना।
१०. अविग्रह—शत्रु के उठ खड़ा होने पर पुनः उसके साथ युद्ध करना।
११. परिवर्तन—शत्रु पर प्रहार करने के लिये उसके चारों ओर जाना।
१२. संवर्त—शत्रु के आगे बढ़ने को रोकना।
१३. अवप्लुत—शत्रु के प्रहार को रोकने के लिये नीचा होकर निकलना।
१४. उपप्लुत—उसी प्रकार प्रहार को पीछे हटकर रोकना।
१५. उपन्यस्त—शत्रु के निकट आकर गदा से प्रहार करना।
१६. अपन्यस्त—घूमकर पीछे किये हुए हाथ से शत्रु को मारना।
१७. कौशिकान्—उन्मत्त के समान शत्रु को धोखा देकर प्रहार करना।

---

१. अथर्व० ५।५।४, १०।४।९

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

रामायण में राक्षसों द्वारा वानर वीरों का संहार दण्ड तथा अन्य शस्त्रास्त्रों से करने का वर्णन मिलता है।[१] इसी भाँति वानरों द्वारा वृक्षों को उखाड़ उनका गदा एवं दण्ड की भाँति प्रयोग करने का उल्लेख है। वहाँ लोहे के दण्ड, मूसल और लाठी का प्रयोग किया गया है।[२]

श्रीकृष्णजी की नारायणी सेना दण्ड-प्रहरण में निपुण थी। महाभारत में अनेक स्थलों पर लाठी, लगुड और मूसल तथा लोहे के दण्डों का प्रयोग मिलता है।[३]

यादवों का मदिरापान द्वारा विनष्ट होने का समाचार जानकर अर्जुन द्वारिका जाकर उनकी स्त्रियों, बच्चों और वृद्धजनों को लेकर जब इन्द्रप्रस्थ लौट रहे थे तब मार्ग में उन्हें किरातों ने लूट लिया। वे सभी लठ्ठधारी थे।[४]

शान्तिपर्व में दण्ड का आलङ्कारिक वर्णन किया है।[५] तदनुसार भगवान् शिव ने चिरकाल तक समाधिस्थ रहने के पश्चात् अपने आपको दण्डरूप में उत्पन्न किया। यह दण्ड महादेवजी ने विष्णु को धर्मरक्षार्थ प्रदान किया। विष्णु ने अङ्गिरा को, अङ्गिरा ने इन्द्र को, इन्द्र ने मरीचि को, मरीचि ने भृगु, भृगु ने ऋषियों को, ऋषियों ने लोकपाल, लोकपाल ने क्षुप और क्षुप ने मनु को यह दण्ड प्रदान किया।

८. पंजा—शस्त्रवाले हाथ की कलाई पर प्रहार करना। इनमें चीर सीधा सामने से मारा जाता है। हूल दाहिने हाथ को बायीं ओर लाकर मारते हैं पाँचवा शिर, छठा बाहेरा और आठवाँ पंजा ये पैंतरे चलकर दाहिने हाथ को बायीं ओर लाकर मारे जाते हैं। इन प्रहारों को प्रतिपक्षी बायें हाथ से पैतरा चलकर रोके। इस प्रकरण में नाभि से नीचे प्रहार करने का निषेध किया है। नाभि से नीचे प्रहार करना पुरातन क्षत्रिय परम्परा के विरुद्ध है।

स्थानानि—

समपादं गजस्यैव विषमं वृषभस्य च। सिंहस्य चोन्नतं पादं चलत् पादं मृगस्य च॥

—म० पु० ७।११

योद्धव्या सर्वमल्लास्तु द्वन्द्वशोऽथ यथाबलम्। मल्लैस्तु सावधानैश्च कर्त्तव्यं युद्धमुत्तमम्।। ४८।।
कराङ्गुलिषु संवेश्य सूत्रग्रथितमायुधम्। तेन सूत्रमयेनाथ जयमन्त्रकृतेन वा॥ ४९॥

गज प्रकृतिवाले मल्ल का पवित्रा समपाद (दोनों पैरों को समानान्तर तथा कुछ झुकाकर खड़ा होना), वृषभ प्रकृति मल्ल को विषम पाद (एक पैर आगे कुछ मुड़ा हुआ, दूसरा पीछे सीधा), सिंह प्रकृति मल्ल का एक पैर उठा हुआ और मृग प्रकृतिवाले मल्ल के दोनों पैर चलते रहते हैं॥ ११ ॥

सभी मल्लों को जोड़ी बनाकर समान बलवालों के साथ लड़ना चाहिये। युद्ध के समय सावधानी रखना आवश्यक है॥ ४९ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



सामूहिक उत्सवों
पर मल्लयुद्ध



ततोऽस्यजानुना पृष्ठमपीड्य बलादिव।
बाहुना परिजग्राह दक्षिणेन शिरोधराम्॥
सव्येन च कटिदेशे गृह्य वाससि पाण्डवः।
तद् रक्षो द्विगुणं चक्रे रुवन्तं भैरवं रवम्॥



एकां जंघा पदाक्रम्य परामुद्यम्य पाट्यते।
केतकी पत्र वच्छत्रुर्युद्धं तद् बाहुकण्टकम्॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शत्रुभङ्गे भवेन्मल्लो जयश्रीः प्राप्यतेऽचिरात्। तेन बाणप्रहारस्तु मल्लाङ्गेषु प्रजायते॥ ५०॥
चरणेन प्रहारस्तु प्रहारो जानुभिस्तथा। कटिप्रहार उरसा पृष्ठेनाथ करेण च॥ ५१॥
मुष्टिप्रहार इतरः शिरसा च ललाटके। राजा च जयिनं मल्लं कुर्याच्छृंगारसंयुतम्॥ ५२॥

—मल्लपु० अ० १४

नियुद्ध

महाभारतकालीन नियुद्ध के दावपेंच—द्रोणपर्व में सात्यकि और भूरिश्रवा ने ३२ विज्ञानों का प्रयोग नियुद्ध करते समय किया।[१] जिनके नाम भी अन्य कई स्थानों पर आये हैं। कुछ स्थलों पर प्रयुक्त विज्ञान का स्पष्ट वर्णन भी किया है, जैसाकि भीम द्वारा प्रयुक्त पृष्ठभङ्ग एवं बाहुकण्टक विज्ञान। श्री नीलकण्ठ शास्त्री ने इन विज्ञानों की स्पष्ट व्याख्या की है। उनसे पहले उपलब्ध साहित्य में से ये उद्धरण लिये गये हैं, ऐसा प्रतीत होता है। नियुद्ध में हाथ, पैर, घुटना, कुहनी एवं शिर से प्रहार, प्रतिपक्षी को दावपेंच से नीचे गिराना, उसे नियन्त्रित करने के लिये बन्ध लगाना और मर्म-स्थानों पर आघात करके मारना सम्मिलित है। मल्लपुराण में कहे आसुर युद्ध और मारयुद्ध इसी के अन्तर्गत आते हैं। यहाँ इन विज्ञानों का यथासम्भव सचित्र वर्णन किया जायेगा।

पृष्ठभङ्ग—

ततोऽस्य जानुना पृष्ठमवपीड्य बलादिव। बाहुना परिजग्राह दक्षिणेन शिरोधराम्॥ २६॥
सव्येन च कटिदेशे गृह्य वाससि पाण्डव। तद् रक्षो द्विगुणं चक्रे रुवन्तं भैरवं रवम्॥ २७॥

—महा० आदि पर्व अ० १३६

सभापर्व अध्याय २३, श्लोक १३-२३—भारतभावदीपटीका पृष्ठ ४४

(१) चित्रहस्तादिकम्—

हस्तस्यातिवेगेन आकुञ्चनप्रसारणोपर्यधश्चालनमुष्टीकरणानि चित्रहस्ता आदि पदात्पादस्याकुञ्चनादि।

(२) कक्षाबन्धम्—

परस्परकक्षायां हस्तौ कृत्वा बन्धनम्।

हाथ की अङ्गुलियों में सूत्र से युक्त आयुध (वज्रमुष्टि) को धारण करे। यह सूत्रयुक्त आयुध, जय का हेतु है। इससे मल्ल प्रतिपक्षी शत्रु मल्ल को परास्त करने में सफल हो शीघ्र ही जयश्री प्राप्त करता है तथा इससे मल्ल के अङ्गों पर बाण-जैसा आघात लगता है॥ ५०॥

इसके अतिरिक्त पैर से प्रहार, घुटने से प्रहार, वक्षस्थल, पृष्ठभाग या हाथ से कटि पर प्रहार अथवा शिर पर अपने शिर या मुष्टि से प्रहार भी दोनों मल्ल परस्पर करें। जिस मल्ल का जय होवे राजा उसे विविध वस्त्राभूषण देकर पुरस्कृत करे॥ ५१-५२॥

हाथ को वेगपूर्वक सिकोड़ना, फैलाना, ऊपर-नीचे चलाना, मुष्टि बाँधना एवं इसी प्रकार पैर से क्रिया करना चित्रहस्त कहलाता है।

एक-दूसरे की कक्षा (बग़ल) में हाथ डालकर बाँधना।

प्रतिपक्षी के गल (ग्रीवा) पर अपने शिर के अग्रभाग से प्रहार करना।

---

१. द्वात्रिंशत् करणानि स्युर्यानि युद्धानि भारत। —महा० द्रो० १४३।४७

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(३) गलगण्डम्—

गले गण्डेन भालदेशेनाभिघातस्तेन।

(४) बाहुपाशः चरणपाशः—

बाहुपाशादिकं चरणपाश आदि शब्दार्थः। पादाभ्यामाहताः शिरास्नायवो याभ्यां तौ।

(५) उरोहस्तम्—

उरसि चपेटाप्रहारम्।

(६) पूर्णकुम्भौ—

ग्रथिताङ्गुलिभ्यां हस्ताभ्यां परशिरसः पीडनं पूर्णकुम्भः।
(द्वित्वं परस्परं द्वावपि चक्रतुरिति वक्तुम्।)

(७) उदरम्—

आवृत्य जत्रुदेशे पृष्ठं कृत्वा बाहुभिः बहुत्वाद् द्वावपि मिथं उदरमादाय प्रचक्रतुः प्रचिक्षिपतुः। कृ विक्षेपे अस्य रूपम्। एवं कट्यां सुपार्श्वे च प्रचक्षतुः। तक्षवन्तौ तक्षस्तनुकरणं गात्रं संकोच इत्यर्थः।

(८) अधोहस्तम्—

उरसि अधस्ताद् हस्तं कृत्वा हस्ताभ्यामुदरमावेष्ट्य
स्वकण्ठे स्वोरसि च कण्ठोरः समीपे आनीय आक्षिपत्।

(९) पृष्ठभङ्गम्—

पृष्ठस्य भूसम्बन्धेन जातं भङ्गं पराभवम्।

(१०) सम्पूर्णमूर्च्छा—

बाहुभ्यामुदरादिनिपीडने सम्पूर्णमूर्च्छाम्।

(११) तृणपीडम्—

रज्जूकरणे तृणमिव यत्र बाह्वादिकं व्यावर्त्यते तद् युद्धं तृणपीडम्।

(१२) पूर्णयोगः—

पूर्णयोगं योगो विश्रब्धपातनं तच्च पूर्णं अन्यत्र मुष्टेः पातं प्रदर्श्यान्यत्र पातनमित्यर्थः।

हाथ पैरों से परस्पर एक-दूसरे को जकड़कर शिरा एवं स्नायु का अवपीडन करना।

छाती में थप्पड़ मारना।

दोनों हाथों की अङ्गुली परस्पर बाँधकर दोनों हाथों से प्रतिपक्षी के शिर को दबाना।

अपनी भुजाओं से प्रतिपक्षी की पीठ को लपेटकर उसे अपनी हँसली के पास लाकर गिराना।

छाती के नीचे से हाथ लाकर दोनों हाथों से प्रतिपक्षी को जकड़कर उसे अपनी छाती और ग्रीवा के समीप लाकर गिराना।

प्रतिपक्षी को पीठ के बल गिराना या उसकी रीढ़ की हड्डी को तोड़ना।

दोनों भुजाओं द्वारा उदर पर आघात करना या उसे अत्यधिक दबाकर मूर्च्छित करना।

जैसे रस्सी बटी जाती है, उसी प्रकार हाथ को मरोड़ना।

निरन्तर मुष्टिप्रहार करना अथवा अन्यत्र मुष्टिप्रहार दिखाकर दूसरे स्थान पर धोखे से मारना।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नियुद्ध विज्ञान



कक्षाबन्धम्



मुष्टि



पूर्णकुम्भ



उदर

तृणपीड



निग्रह

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नियुद्ध विज्ञान



वराहोद्धृत निस्वन



तल (चपेटा मारना)



केशाकर्षण



प्रकर्षण-२

हस्त त्रोटन



प्रकर्षण-१

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

(१३) निग्रहः —

हस्ताभ्यां कन्धराकर्षणेन शत्रोरधोमुखी करणम्।

(१४) प्रग्रहः —

शत्रोरुत्तानपातनार्थं पादाकर्षणम्।

(१५) प्रकर्षणम् —

पश्चादपसारणम्। इतरोनुकर्षति अवाङ्मुखमनुपातयितुम्।

(१६) आकर्षम् —

अर्वाक्करणम्। इतरो विकर्षति तिर्यङ् नयतीत्यर्थः।

निपात्य पेषणं भूमौ प्रमाथ इति कथ्यते। यत्तूत्थायाङ्गमथनं तदुन्मथनमुच्यते॥ १॥
क्षेपणं कथ्यते यत्तु स्थानात् प्रच्यावनं हठात्। उभयोर्भुजयोर्मुष्टिरुरोर्मध्ये निपात्यते।
मुष्टिरित्युच्यते तज्ज्ञैर्मल्लविद्याविशारदैः॥ २॥
अवाङ्मुखं स्कन्धगतं भ्रामयित्वा तदेव यः। क्षिप्तस्य शब्दः स भवेद् वराहोद्धूतनिःस्वनः॥ ३॥
तर्जन्यङ्गुष्ठमध्येन प्रसारितकरो हि यः। सम्प्रहारतलाख्यस्तु संग्राहो वज्रमिष्यते॥ ४॥
अङ्गुल्यः प्रसृता यास्तु ताः प्रसृष्टा उदीरिताः।
आकृष्य क्रोडीकरणं प्रकर्षणमुदाहृतम्। आकर्षणं लीलयैव सम्मुखीकरणं स्मृतम्॥ ५॥

निग्रह—दोनों हाथों से शत्रु की ग्रीवा पकड़कर उसे नीचे की ओर दबाना।

शत्रु को सीधा डालने के लिये पैरों को खींचना (पट्ट निकालना)।

पीछे की ओर ढकेलना जिससे दूसरा गिर पड़े।

उलटा गिराना।

प्रमाथ—प्रतिपक्षी को भूमि पर डालकर उसे पीसना (रगड़े देना) प्रमाथ कहलाता है।

उन्मथन—खड़े-खड़े ही दूसरे के अङ्गों को पीड़ित करना अथवा द्वितीय मल्ल का नीचे से दाव लगाकर ऊपर आना और प्रतिद्वन्द्वी को पीड़ित करना।

क्षेपणम्—द्वितीय मल्ल को स्वस्थान से बलपूर्वक ढकेलना क्षेपण कहलाता है।

मुष्टि—अपनी दोनों भुजाओं की मुष्टि बाँधकर प्रतिद्वन्द्वी के वक्षस्थल (छाती) में प्रहार करने को मल्लशास्त्र के वेत्ताओं ने मुष्टि कहा है।

प्रतिपक्षी को ऊपर उठाकर उसका मुख नीचे करके (निकाल आदि दावों को लगाकर) उसे घुमाकर नीचे फेंकना (जिसके फेंकने से ऐसा शब्द हो जैसे सूअर ने टक्कर मारी हो) वराहोद्धूत निःस्वन होता है।

सम्प्रहार—तर्जनी और अङ्गुष्ठ के मध्यभाग को फैलाकर (जिसमें चारों अङ्गुलियाँ परस्पर मिली रहें) थप्पड़ मारना सम्प्रहार माना गया है।

प्रसृष्ट—जब सभी अङ्गुलियों को फैलाकर थप्पड़ या चपेटा मारते हैं तो उसे प्रसृष्ट कहा गया है।

प्रतिपक्षी को खेंचकर, उसे दबाकर उसकी गाँठ-सी बाँधना प्रकर्षण कहा जाता है।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पुरः पश्चात्पार्श्वयोश्चाभ्याकर्षो भ्रमणं तथा। पश्चात्प्रपातनं वेगाद्विकर्षणमुदाहृतम्॥ ६॥

—विराटपर्व अ० १३, भा० भा० दीप० पृष्ठ २०

बाहुकण्टकयुद्धम्[१]—

बाहुकण्टकं केतकपत्रं तद्वद् यत्र बलिना दुर्बलस्य शरीरं पाट्यते तद् बाहुकण्टकं नाम युद्धम्।
यथोक्तमेकां जङ्घां पदाक्रम्य परामुद्यम्य पाट्यते। केतकीपत्रवच्छत्रुर्युद्धं तद्बाहुकंटकम्॥

—महा०, शान्ति०, अ० ६, श्लोक ४ भा० भा० दी० टीका पृष्ठ ७

मानसोल्लासे विज्ञानानि—

संस्थानानि च चत्वारि कल्पयेयुर्दृढानि च। विज्ञानानि च सर्वाणि तेऽभ्यसेयुरशेषतः॥ ९३॥
वक्ष्यामि [२]स्थानकानाञ्च विज्ञानानां च लक्षणम्। कक्षे पूर्वापरे धृत्वा प्रोत्तानपतितस्य हि॥ ९४॥
तत्कपोलं स्वपार्श्वेन सम्पीड्यार्धाङ्गकं भवेत्। पुरः कक्षं समादाय पूर्ववत्पातितः स हि॥ ९५॥
मूर्ध्नि कूर्मासनं बद्ध्वा भजेद्वाप्येकपादकम्। उत्तानप्रतिमल्लस्य निवार्य चरणद्वयम्॥ ९६॥
उदरस्योपरिस्थानं स्थानं करवलं स्मृतम्। स्वयमुत्तानपतितो जठरागमनोद्यतम्॥ ९७॥

लीलापूर्वक (दावपेंच या धोखा देकर) अपनी ओर खेंचना आकर्षण कहलाता है।

विकर्षण—सामने से, पीछे से, पार्श्वभाग (बराबर) से प्रतिपक्षी को अपनी ओर खींचकर उसे चक्र देकर वेगपूर्वक (झटके से) पीछे गिरा देना विकर्षण कहा गया है।

बाहुकण्टक—बाहुकण्टक केतकी का पत्ता होता है, उसी के समान बली पुरुष के द्वारा दूसरे को भूमि पर डाल, एक पैर से उसकी जङ्घा को दबाकर दूसरे पैर को अपने हाथों से ऊपर को उठाकर केतकी के पत्र के समान उसके शरीर को फाड़ा जाता है। इस युद्ध को बाहुकण्टक कहते हैं।

मानसोल्लास में नियुद्ध के विज्ञान—चार प्रकार के संस्थान (स्थिति, पैंतरा आदि) जिनसे सुदृढ़ होकर लड़ा जाये और सभी विज्ञान (दावपेंचादि) का अभ्यास सभी मल्ल करें॥ ९३॥

अब स्थान और विज्ञानों का लक्षण कहता हूँ—

स्थान—प्रतिपक्षी के सीधा गिरने पर, उसे दोनों कक्षा (बग़लों) से पकड़कर अपनी बग़ल से उसके कपोल (गण्डस्थल, गाल) को दबाकर रखना अर्धाङ्गक स्थान होता है॥

सामने से बगल में हाथ डालकर प्रतिपक्षी को पूर्ववत् सीधा डालने पर उसके सिर पर कूर्मासन (अपने हाथ-पैरों को कछुवे के सदृश सिकोड़ना) बाँधकर उसे काबू करे अथवा दूसरे मल्ल के सीधा गिरने पर अपने दोनों पैरों को उसके पेट पर रखना करवल स्थान कहलाता है॥ ९६॥

अपने आप सीधा गिर जाने पर प्रतिपक्षी द्वारा जठर (पेट) पर प्रहार करने के लिये उद्यत होने पर अपने दोनों पैरों द्वारा प्रहार करना जठरस्थान कहलाता है॥ ९७॥

---

१. बाहुकण्टकयुद्धेन तस्य कर्णोऽथ युध्यतः। बिभेद सन्धिं देहस्य जरया श्लेषितस्य च॥ —म०शान्ति० ६।४

२. **मल्लपुराणे—**
अथ द्वादश स्थानानि कथ्यन्ते मल्लकर्मणि। जयस्थानकमप्यत्र चतुर्धा परिकीर्तितम्॥ १०॥
शिरसि स्थानकं प्रोक्तं स्थानं करतलेऽपि च। उदरस्थानकं वापि पृष्ठस्थानमतः परम्॥ ११॥ —अ० ८

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

स्थान

अर्धांगक स्थान





करवल स्थान

करवल स्थान



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पादाभ्यां पीडयन्मध्ये जठरस्थानकं भवेत्। पराङ्मुखस्य मल्लस्य स्थितस्य पतितस्य वा ॥ ९८ ॥
कक्षामाक्रम्य पार्श्वाभ्यां पृष्ठस्थानकमाचरेत्। उक्तानि स्थानकान्येवं विज्ञानानि प्रचक्ष्महे ॥ ९९ ॥
स्वरूपेण तथा नाम्ना विस्तरेण यथागमम्। अर्धाङ्गस्थानकस्थेन मल्लेन स्थूलवर्ष्मणा ॥ १०० ॥
पीडनान्मुखदेशस्य विज्ञानं स्यात् तदेव तु। स्थित्वैवार्धाङ्गके स्थाने पादस्याकर्षणं बहिः ॥ १०१ ॥
बहिः पणमिति ज्ञेयं विज्ञानं पादमोटनम्। शिरःस्थानकमास्थाय गृहीत्वैकेन मूर्धकम् ॥ १०२ ॥
अन्येन तत्करस्याधःक्षिप्तेन स्वकरे धृते। बहिर्भागे च वलिते विज्ञानं बाहुमोटनम् ॥ १०३ ॥
तस्यैव परिदत्तस्य मोटने बाहुसी भवेत्। जङ्घाभ्यां च भुजाक्रान्तौ ताभ्यां शिरसि पीडिते ॥ १०४ ॥
पुरः कक्षां समाकृष्य गुणालं प्राणघातकम्। ग्रीवायाः सभुजायाश्च पादेनाक्रमणे सति ॥ १०५ ॥
अन्यजान्ववबद्धेन कुर्यादुत्तरढोङ्करम्। शिरः स्थितेन मल्लेन विक्षेपायोद्यतं पदम् ॥ १०६ ॥
गृहीत्वा सक्थियुग्मेन कक्ष्ये निक्षिप्य पार्ष्णिकम्। उत्तानजानुदेशस्य कटियन्त्रेण पीडनम् ॥ १०७ ॥
पट्टिशं नाम विज्ञानं जानुसन्धिप्रभञ्जनम्। अनेनैव प्रकारेण बाहुसन्धिप्रपीडनम् ॥ १०८ ॥
छुडुकीनाम विज्ञानं प्राह सोमेशभूपतिः। अधो विधाय तद् बाहोः पूर्ववत् पीडनं यदि ॥ १०९ ॥

प्रतिपक्षी मल्ल के औंधा गिरने पर या औंधा रहने पर अपने पार्श्वभाग (बग़ल) से उसकी कक्षा को पीड़ित करना पृष्ठस्थान होता है ॥ ९८ ॥

स्थानों का वर्णन कर दिया है, अब विज्ञानों को कहते हैं ॥ ९९ ॥

अपने स्वरूप और नामों से विज्ञानों का विस्तार जानना चाहिये। अर्धाङ्गस्थान से स्थित होकर स्थूलकाय मल्ल के द्वारा प्रतिपक्षी के मुखस्थान को पीड़ित करना अर्धाङ्गविज्ञान के नाम से ही प्रसिद्ध होता है ॥ १०० ॥

अर्धाङ्गस्थान में बैठकर प्रतिपक्षी के पैर को बाहर की ओर खींचना (मरोड़ना) पादमोटन-विज्ञान जानना चाहिये ॥ प्रतिपक्षी के शिर के पास बैठकर एक हाथ से उसका शिर दबाकर दूसरे हाथ को उसके हाथ के नीचे से निकालकर उसके हाथ को पकड़कर बाहर की ओर मरोड़ना बाहुमोटनविज्ञान होता है ॥ १०२–१०३ ॥

उसी हाथ को ऊपर से दोनों हाथों से बाँधकर मरोड़ना (दबाना) बाहुसीविज्ञान होता है। जङ्घाओं (पिंडली) द्वारा प्रतिपक्षी की दोनों भुजाओं को दबाकर उसके शिर को पीड़ित करना (चोट पहुँचाना) और सामने से कक्षा (बग़ल) को खेंचना यह प्राणघातक गुणालविज्ञान है ॥ १०४½ ॥ प्रतिपक्षी की ग्रीवा को और भुजा को भी अपने अधिकार में करके उसके घुटनों में अपना घुटना डालकर गिरानेवाला उत्तरढोङ्कर दाव करे ॥ १०५½ ॥

शिर की ओर स्थित होने पर प्रतिपक्षी द्वारा प्रहार करने को उठाया हुआ पैर पकड़कर अपनी दोनों जङ्घाओं से उसे दबाकर बग़ल में पार्ष्णिक (एड़ी) को लाकर घुटने के सीधा होने पर उसे मोड़कर कमर से दबाना (घुटने को तोड़ना) पट्टिशविज्ञान है ॥ १०७½ ॥

इसी प्रकार हाथ को तोड़ा जाता है। इसे 'सोमेश्वर' ने छुडुकीविज्ञान कहा है ॥ १०८½ ॥

इसी दाव को नीचे से लगाकर पूर्ववत् बाहु को तोड़ना अन्तःछुडुकीविज्ञान कहलाता है ॥ १०९½ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नियुद्ध के विभिन्न विज्ञान, बन्ध

पाद मोटन



बाहु मोटन

ढोङ्कार



पादमुद्वड

चरणपट्टिश



तुर्यष्टि



छुडुकी



गुणाल

चरणपट्टिश

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विज्ञानमन्तश्छुडुकी बाहुसन्धिप्रभञ्जनी। मन्यां कक्षे विनिक्षिप्य भुजेनैकेन संयुताम्॥ ११०॥
गलं प्रकोष्ठेना पीड्य तत् करेण करान्तरम्। सन्धौ प्रगृह्य जठरं सक्थिभ्यां परिपीडयेत्॥ १११॥
ततस्तद् ढोङ्करं नाम विज्ञानं जीवघातनम्। अर्धाङ्गस्थानके स्थित्वा बाहुभ्यां मध्यमुन्नयन्॥ ११२॥
पार्श्वेन पीडयन् कण्ठं कक्षामूरुं स्वजङ्घया। तुर्यष्टिरिति विज्ञेयं विज्ञानं मध्यभञ्जनम्॥ ११३॥
शिरःस्थानकविज्ञानान्यमूनेकादशैव तु। स्थाने करवले स्थित्वा वक्त्रेक्षिप्त्वा निजोदरम्॥ ११४॥
पादमुद्दवडं नाम्ना विज्ञानं श्वासरोधनम्। उरसा पीडनं तद्वद् विज्ञानं मुखपट्टकम्॥ ११५॥
हस्तद्वयेन वक्त्रस्य पिधानं मुस्तिकाह्वयम्। स्थित्वा करवले स्थाने मणिबन्धस्य मोटनम्॥ ११६॥
क्रियते यत्र तत्प्रोक्तं कुट्टानं करभञ्जनम्। बाहुभ्यां मध्यमाक्रम्य जङ्घामाक्रम्य जङ्घया॥ ११७॥
जानुसन्धिविभागार्थं भजेच्चरणपट्टिशम्। परस्य जानुसन्धौ तु करं निक्षिप्य कञ्चन॥ ११८॥
जङ्घाभ्यामुरुमाक्रम्य विदध्याल्लोलपादकम्। जठर स्थानके स्थित्वा बाह्वोर्यत्र निपीडनम्॥ ११९॥
संदशाकृतिबाहुभ्यां सन्दंशं नाम तद्भवेत्। जङ्घां विधाय मन्यायां जानुसन्धिनिपीडिताम्॥ १२०॥

मन्या (ग्रीवा) को काँख में दबाकर इसी अवस्था में एक हाथ के प्रकोष्ठ (पहुँचे) से प्रतिपक्षी का गला दबाये और दूसरे हाथ से उसका दूसरा हाथ सन्धिस्थान से दबाकर उसके उदर को अपनी जङ्घाओं द्वारा दबाकर पीड़ित करे, यह प्राणों को लेनेवाला ढोंकर नामवाला विज्ञान है॥ ११०-१११½॥

अर्धाङ्गस्थान से बैठकर अपनी भुजाओं द्वारा प्रतिपक्षी के मध्यभाग को (पेट) को ऊँचा उठाते हुए बग़ल से उसके कण्ठ को दबाना और उसकी बग़ल और जङ्घा को अपनी जङ्घा (पिंडली) से दबाना तुर्यष्टिविज्ञान कहलाता है। यह मध्यभाग का तोड़नेवाला है॥ ११२-११३॥

इस प्रकार अर्धाङ्गस्थान से बैठकर लगाने के ग्यारह विज्ञान कहे गये हैं॥ ११३½॥

करवल-(हाथ-पैर सिकोड़कर कछुवे की भाँति बैठना)-स्थान से बैठकर अपना पेट प्रतिपक्षी के मुख पर लाकर उसका श्वास रोकना पादमुद्दवडविज्ञान कहलाता है॥ ११४½॥

इसी भाँति छाती से मुख दबाकर श्वास रोकना मुखपट्टविज्ञान होता है॥ ११५॥

दोनों हाथों से प्रतिपक्षी के मुख को दबाकर उसका श्वास रोकना मुस्तिका नामक दाव होता है॥ ११५½॥

करवल स्थान से बैठकर मणिबन्ध (कलाई) को मोड़ना कुट्टानविज्ञान कहा है॥ ११६½॥

अपनी दोनों भुजाओं द्वारा प्रतिपक्षी का मध्यभाग (कटि या उदर) पकड़कर अपनी जाङ्घ (पिंडली) से उसकी जाङ्घ को काबू में करके घुटने से पैर तोड़ने में चरणपट्टिश का प्रयोग करे॥ ११७½॥

दूसरे के घुटनों के जोड़ में अपना कोई-सा भी हाथ डालकर जाङ्घों से उसके उस प्रदेश को दबाकर लोलपादविज्ञान का प्रदर्शन करे॥ ११८½॥

जठरस्थान (पीठ के बल सीधा गिरना) में स्थित हो, अपने दोनों हाथों को संडासी (Cross) के सदृश करके प्रतिपक्षी की भुजाओं को पीड़ित करना सन्दंशविज्ञान होता है। जङ्घा को मन्या (ग्रीवा) में डालकर उससे घुटनों को सन्धिभाग द्वारा पीड़ित करता हुआ शिखा या बग़ल (कन्धे के पासवाला भाग) को खींचता हुआ ढोङ्कार दाव को लगाये॥ १२०½॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

नियुद्ध के विभिन्न विज्ञान, बन्ध



गूढांगुली



गरुडपक्ष



वेष्टन

वध



अंगवलन

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चूडां वा पूर्वकक्षां वा कर्षन् ढोङ्कारमाचरेत्। उरुभ्यां मध्यमाक्रम्य पादौ निक्षिप्य कक्षयोः ॥ १२१ ॥
आविध्य बाहुना जङ्घे कुर्याज्जवलशङ्खकम्। साम्याज्जवलशङ्खस्य पादस्यैकस्य पीडनात् ॥ १२२ ॥
उक्तं कक्षवडं नाम विज्ञानं पादभञ्जनम्। सर्वाङ्गं पीडयेद् यत्र मध्यमाक्रम्य तिष्ठतः ॥ १२३ ॥
सुमुखीनाम विज्ञानं सङ्कोचादङ्गसाधनम्। उरुभ्यां मध्यमाक्रम्य मन्यां कक्षान्तरे क्षिपेत् ॥ १२४ ॥
ज्ञेयं गूढांगुलिर्नाम विज्ञानं कण्ठमोटनम्। पृष्ठ स्थानकमास्थाय बाहू कक्षान्तनिर्गतौ ॥ १२५ ॥
मन्यायां सङ्गतौ कृत्वा करशाखानिबन्धनौ। ताभ्यां सम्पीडयेन्मन्यां कुर्वंश्चाधोमुखं शिरः ॥ १२६ ॥
उरुभ्यां मध्यमापीड्य युज्याद् गरुडपक्षकम्। पृष्ठस्थः प्रतिमल्लस्य पृष्ठपृष्ठे भुजं बलात् ॥ १२७ ॥
आकृष्य वर्तयन्कुर्याद् विज्ञानं वेष्टनं बुधः। जानुसन्धौ क्षिपेज्जङ्घां पतितः स्यादवाङ्मुखम् ॥ १२८ ॥
उरसा पीडयेद् पादं तदङ्गवलनं भवेत्। मन्यां कक्षान्तरे कुर्याद् बाहुं गरुडपक्षवत् ॥ १२९ ॥
मध्यपीडनयोगेन भवेत् सदुपवेदनम्। एकद्वित्र्यङ्गुलीं मुक्त्वा करशाखाचतुष्टयम् ॥ १३० ॥
भज्यतेऽङ्गुष्ठवर्ज्यं तद् विज्ञानं चतुरङ्गुलम्। बाहुना बाहुमाविध्य धृत्वा चान्येन मुद्धकम् ॥ १३१ ॥

जाङ्घों से प्रतिपक्षी के मध्यभाग (कटिप्रदेश) को दबाकर दोनों पैरों को उसकी कक्षाओं में डाले और अपनी भुजा से उसकी जाङ्घों को पीड़ित करे, इसे जवलशङ्खविज्ञान कहते हैं ॥ १२१½ ॥

जवलशङ्ख के सदृश ही जब एक पैर को पीड़ित किया जाये तो पैर को तोड़नेवाला यह कक्षवडविज्ञान है ॥ १२२ ॥

खड़े हुए प्रतिद्वन्द्वी की कमर पर अपने शरीर को सङ्कुचित करके प्रहार करके उसके सभी अवयवों को पीड़ित करना सुमुखी विज्ञान है ॥ १२३ ॥

जाङ्घों से प्रतिपक्षी की कमर पकड़कर उसकी मन्या (ग्रीवा) को अपनी कक्षा (काँख) में दबाकर कण्ठ को दबानेवाला गूढ़ाङ्गुलीविज्ञान जानना चाहिये ॥ १२४ ॥

प्रतिपक्षी के औंधा गिरने पर स्वयं उसकी कमर के पास बैठकर अपने दोनों हाथ उसकी बग़लों में डालकर ऊपर ले जाकर उसकी ग्रीवा को पीछे से परस्पर दोनों हाथों की अङ्गुलियाँ मिलाकर प्रतिपक्षी की ग्रीवा दबाये और उसका शिर नीचा कर दे। उसके पश्चात् अपने पैरों से उसकी कमर को बाँधे, इसे गरुड़पक्षविज्ञान कहते हैं ॥ १२५-१२६ ॥

प्रतिपक्षी मल्ल के पृष्ठस्थान में (औंधा) होने पर अपनी भुजा पेट के नीचे से डालकर उसकी पीठ को खेंचता हुआ वेष्टनविज्ञान को करे ॥ १२७ ॥

प्रतिपक्षी के औंधा स्थित होने पर उसके घुटने की सन्धि में अपना पैर डालकर स्वयं भी औंधा होते हुए छाती से उसके पैर को दबाये, इसे अङ्गवलन कहते हैं ॥ १२८ ॥

ग्रीवा को बग़ल में डालकर पूर्ववत् हाथों को गरुड़पक्ष की भाँति डालकर मध्यभाग को दबाना सदुपवेदनविज्ञान होता है ॥ १२९ ॥

एक, दो, तीन या चारों अङ्गुलियाँ अंगूठे को छोड़कर तोड़ना या मरोड़ना चतुरङ्गुलविज्ञान कहलाता है ॥ १३० ॥

प्रतिपक्षी के एक हाथ को अपने एक हाथ से दबाकर (सांडी तोड़कर) दूसरे से उसके शिर को तिरछा मरोड़ना त्रधनामकविज्ञान है ॥ १३१ ॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



जवलक्षांघ



दाव की काट



गूढांगुली

करवल स्थान आक्रमण



कक्षावड



ढोङ्कार

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

मोट्यते तु शिरस्तिर्यग्विज्ञानं तद्वधाभिधम्। हस्तौ पादौ च शीर्षं च पद्भ्यामावेष्ट्य पीडनात्॥ १३२॥
विज्ञानं तत् समाख्यातं डोक्करं सकुटुम्बकम्। विज्ञानान्येवमुक्तानि बन्धमोटनकारणम्॥ १३३॥
वक्ष्यामि वञ्चनोपायान्विधिवच्छास्त्रदृष्टितः। छुडुक्यां तु प्रयुक्तायां भ्रमित्वा तां निषेधत्येत्॥ १३४॥
मुखस्योपरि जङ्घां वा निक्षिप्य विनिवारयेत्। पट्टिशेन गृहीताङ्घ्रिस्त्रिवृत्यापनयेन्नतम्॥ १३५॥
बाहुमोटनविज्ञानं हस्तौ संयोज्य वारयेत्। शिरस्थानगतं मल्लं बाहुभ्यामुत्क्षिपद् बलात्॥ १३६॥
पादाभ्यामवकर्षेद्वा देहं वा वर्तयेदवाक्। स्थितं करवलैस्थाने जयेच्छुः प्रतिमल्लकम्॥ १३७॥
पश्चात्कक्षान्तरं न्यस्तपादाङ्गुष्ठेन कर्षयेत्। अशक्यश्चेत्तथा क्रष्टुमूरुभ्यां तस्य सक्थिकम्॥ १३८॥
निपीड्य धारयेन्मल्लं यथा नान्यक्षमो भवेत्। जठरस्थानसंलग्नं पुरः कच्छां विधार्य च॥ १३९॥
कूर्पराभ्यां निपीड्योरु अवसृत्य विमोचयेत्। तथा मोचयमानस्य जङ्घे धृत्वा निजाङ्घ्रिणा॥ १४०॥
नाभिदेशे विनुद्याथ पातयेद्धरणीतले। पात्यमानस्तथामल्लः पादं पश्चात् प्रसार्य च॥ १४१॥
तिष्ठेत् स्थैर्यमथालम्ब्य यथा न पतति क्षितौ। पालीदिने नियुद्धाख्यः श्रम एवं निवेदितः॥ १४२॥

पैरों से प्रतिपक्षी के दोनों हाथों को बाँधना, पैरों को बाँधना (कैंची के सदृश) और शिर को बाँधना डोक्करविज्ञान कहलाता है॥ १३२॥

इस प्रकार बाँधने एवं मरोड़ने, तोड़ने के विज्ञान और उनकी विधियों को कह दिया है। अब उनकी काटों को शास्त्रानुसार विधिसहित कहूँगा॥ १३३॥

छुडुकी दाव लगाने पर घूमकर उसकी काट करे॥ १३४॥

अथवा उसके मुख पर अपने पैर से प्रहार करके उसका दाव निष्फल कर दे॥ १३४½॥ पट्टिश दाव से पकड़े हुए पैर की झुके हुए प्रतिपक्षी मल्ल को त्रिवृत्य (तीन बार लेटकर लुढकना) से दूर करे॥ १३५॥ शिर की ओर आये हुए मल्ल को बलपूर्वक अपनी दोनों भुजाओं द्वारा फेंक दे॥ १३६॥ अथवा पैरों से धक्का दे या उलटा लेट जाये॥ १३६॥

दूसरे मल्ल के करवल स्थान में स्थित होकर, अपने ऊपर कब्जा करने की इच्छावाला होने पर कक्षा से स्थित होकर पैर के अंगूठे से खेंचे॥ १३७॥

यदि इस प्रकार खेंचने में असमर्थ हो जाये तो अपनी जङ्घाओं द्वारा उसकी जङ्घा को दबाकर उस मल्ल पर काबू कर ले, जिससे वह दाव न लगा सके॥ १३८॥

जठर-स्थान से स्थित होकर दूसरे मल्ल के पकड़ने पर सामने से उसका कच्छा पकड़कर अपनी कोहनियों से उसकी जाङ्घ दबाकर पीछे होकर छोड़ दे। प्रतिपक्षी मल्ल को छोड़ते हुये अपने पैरों से उसकी जाङ्घ पकड़कर नाभिदेश में प्रहार करके उसे धरती पर डाल दे। उसे डालता हुआ अपना पैर पीछे फैलाकर इस प्रकार स्थित हो कि भूमि पर न गिर पड़े॥ १४१½॥

इस प्रकार प्रदर्शन के दिन नियुद्धश्रम का कथन कर दिया गया है॥ १४२॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

चतुर्थ अध्याय

व्यूह-रचना

विशिष्ट पद्धति से युद्धक्षेत्र में सेना को खड़ा करना व्यूह कहलाता है।[१] भाषा में इसको मोर्चाबन्दी कहते हैं। व्यूह से युक्त सेना अल्पसंख्या में होती हुई भी दूसरी सबल सेना को जीत सकती है। इसके विपरीत सबल सेना भी बिना व्यूह के छोटी व्यूहबद्ध सेना को पराजित नहीं कर सकती।[२]

सर्वप्रथम व्यूह-रचना का सङ्केत अथर्ववेद में मिलता है। वहाँ भोग (सर्पवत् कुण्डलाकृति) द्वारा शत्रु सेना से अपनी रक्षा करने को कहा है।[३] श्री रामचन्द्रजी ने गरुडव्यूह की रचना करके लङ्का की घेराबन्दी की थी।[४] महाभारत युद्ध में तो व्यूहरचना सामान्य बात रही है। इस अध्याय में कौटिल्य-अर्थशास्त्र, अग्निपुराण, विष्णुधर्मोत्तर पुराण, वीरमित्रोदय, शुक्रनीति, वाशिष्ठ-धनुर्वेद तथा अन्य ग्रन्थों से सामग्री लेकर व्यूहरचना-पद्धति, सिद्धान्त तथा अन्य आवश्यक बातों का चित्रों की सहायता से स्पष्टीकरण किया जायेगा।

बलं व्यूहप्रौढं परबलविभेदेऽल्पमपि यद्भवेदूनं व्यूहैर्महदपि जये न क्षमबलम्।
अतो वक्ष्ये व्यूहान् सुरपृतनां पूर्वममराः पराजिग्युर्व्यूहैरुपचितबलां वीर्यमहतीम्॥ १॥

—राजविजये वीरमित्रोदये राजचक्रलक्षणम्

कौटिल्य-अर्थशास्त्रे—

पञ्चधनुः शतापकृष्टदुर्गमवस्थाप्य युद्धमुपेयात्। भूमिवशेन वा विभक्तमुख्यामचक्षुर्विषये मोक्षयित्वा सेनापतिनायकौ व्यूहेयाताम्। शमान्तरं पत्तिं स्थापयेत्। त्रिशमान्तरमश्वम्।

अर्थ—व्यूह (मोर्चाबन्दी) से युक्त सेना अल्पसंख्या में होती हुई भी दूसरी सबल सेना को जीत सकती है। इसके विपरीत सबल सेना भी बिना व्यूह के छोटी सेना को जीतने में असमर्थ रहती है, इसलिये पूर्वकाल में देवताओं ने असुरों की महती और बलवती सेना को जिन व्यूहों से पराजित किया था उनका वर्णन करता हूँ॥ १॥

कौटिल्य-अर्थशास्त्र में—अब व्यूह और सेना का विभाजन तथा अश्व, रथ एवं हाथियों के युद्ध के विषय में कहेंगे। रणक्षेत्र से पाँच सौ धनुष दूरी पर छावनी स्थापित करके विजिगीषु रणक्षेत्र बनवाये। इससे कम दूरी भी रख सकते हैं। प्रमुख सैनिकों को पक्ष-कक्ष आदि पर

---

१. समग्रस्य तु सैन्यस्य विन्यासः स्थानभेदतः। स व्यूह इति विख्यातो युद्धेषु पृथिवीभुजाम्॥
—हलायुधकोष, पृष्ठ ६४६

२. वीरमित्रोदये राजचक्रलक्षणम्।

३. उत्तिष्ठ त्वं देवजनार्बुदे सेनया सह। भञ्जन्नमित्राणां सेनां भोगेभिः परिवारय॥ —अथर्व० ११।९।५

४. (क) गरुडं व्यूहमास्थाय सर्वतो हरिभिर्वृतः। मां विसृज्य महातेजा लङ्कामेवाभिवर्तते॥
—रामा० युद्ध० २१।१२ भण्डारकर संस्करण

(ख) अन्यच्च बलं च तत्र विभजच्छास्त्रदृष्टेन कर्मणा। —रामा० २४।१३

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

पञ्चशमान्तरं रथं हस्तिनं वा। द्विगुणान्तरं त्रिगुणान्तरं वा व्यूहेत। एवं यथासुखमसम्बाधं युध्येत। पञ्चारत्निः धनुः, तस्मिन् धन्विनः स्थापयेत्। त्रि धनुष्यश्वम्, पञ्चधनुषि रथं हस्तिनं वा। पञ्च धनुरनीकसन्धिः पक्षकक्षोरस्यानाम्।

अश्वस्य त्रयः पुरुषाः प्रतियोद्धारः, पंचदश रथस्य, हस्तिनो वा पञ्च चाश्वाः। तावन्तः पादगोपा वाजिरथद्विपानां विधेयाः। त्रीणि त्रिकाण्यनीकं रथानामुरस्यं स्थापयेत्। तावत् कक्षं पक्षञ्चोभयतः। पञ्चचत्वारिंशदेवं रथा व्यूहे भवन्ति। द्वे शते पञ्चविंशतिश्चाश्वाः, षट्शतानि पञ्चसप्ततिश्च पुरुषाः प्रतियोद्धारः। तावन्तः पादगोपा वाजिरथद्विपानाम् (एष समव्यूहः)।

तस्य द्विरथोत्तरा वृद्धिरा एकविंशतिरथादित्यवतोजा दश समव्यूहप्रकृतयो भवन्ति।

पक्षकक्षोरस्यानामतो विषमसंख्याने विषमव्यूहः। तस्यापि द्विरथोत्तरा वृद्धिरा एकविंशति-रथादित्येवमाजौ दशविषमव्यूहप्रकृतयो भवन्ति। अतः सैन्यानां व्यूहशेषमावापः कार्यः। रथानां द्वौ त्रिभागावङ्गेष्वावापयेत्। शेषमुरस्यं स्थापयेत्। एवं त्रिभागोनो रथानामावापः कार्यः। तेन हस्तिनामश्वानामावापो व्याख्यातः। यावदश्वरथ द्विपानांयुद्धसम्बाधं न कुर्यात्तावदावापः कार्यः।

स्थित करते हुए शत्रु की दृष्टि से बचकर सेनापति और नायक व्यूहरचना करें। एक शमा (चौदह अङ्गुल) के अन्तर पर पदाति सैनिक को खड़ा करे।

तीन शमा (बयालीस अङ्गुल) के अन्तर पर घोड़े, पाँच शमा (७० अङ्गुल) के अन्तर से रथ या हाथी को खड़ा करे। अथवा यह अन्तर दुगना या तीन गुणा रखकर व्यूहरचना करे। इस प्रकार सुविधापूर्वक व्यूह बनाकर युद्ध करना चाहिये। पाँच अरत्नि का एक धनुष होता है इतने अन्तर से धनुषधारियों को खड़ा करे। तीन धनुष के अन्तर से घोड़े और पाँच धनुष पर रथ या हाथी को स्थापित करे। व्यूह के भागों (सन्धि, पक्ष, कक्ष, उरस्य) आदि में पाँच धनुष का अन्तर रहना चाहिये।

प्रत्येक अश्वारोही के आगे तीन पदाति, रथ के या हाथी के आगे पन्द्रह सैनिक और पाँच पाँच घुड़सवार और इतने ही (पाँच) पादरक्षक भी निश्चित करने चाहियें। इस प्रकार तीन-तीन की पंक्तियों में नौ-नौ और कक्ष-पक्ष में भी नौ-नौ रथ रक्खे जायें। इस प्रकार एक व्यूह में पैंतालीस रथ, दो सौ पच्चीस घोड़े और छह सौ पचहत्तर पुरुष हुए। यह समव्यूह कहलाता है। इस व्यूह में दो-दो रथ की वृद्धि इक्कीस रथ तक कर सकते हैं, इस प्रकार वृद्धि करने से समव्यूह के दस भेद हो जाते हैं।

पक्ष, कक्ष और उरस्य में रथों की विषम संख्या हो तो वह विषमव्यूह बनता है। इसमें भी दो-दो की वृद्धि करने पर संग्राम में दस प्रकार के विषमव्यूह बनाये जा सकते हैं। इस प्रकार व्यूहरचना करने पर भी यदि सैनिक बच जायें तो उन्हें भी इधर-उधर नियुक्त कर दे। यदि रथ शेष रहें तो उनका दो तिहाई भाग पक्ष और कक्ष में एवं शेष उरस्य में मिला दे, इस प्रकार मिलाये हुए रथों की संख्या एक तिहाई से भी कम ही रहनी चाहिये। इसी प्रकार हाथी और घोड़ों के विषय में भी यही नियम रहेगा। जब तक युद्ध करने में बाधा न हो तब तक उसमें हाथी-घोड़े और रथों को मिलाता जाय।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



व्यूह संरचना

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

दण्डबाहुल्यमावापः। पत्तिबाहुल्यं प्रत्यावापः। एकाङ्गबाहुल्यमन्वावापः। दूष्यबाहुल्यमत्यावापः। परावापात्प्रत्यावापादाचतुर्गुणादाष्टगुणादिति वा विभवतः सैन्यानामावापः कार्यः। रथव्यूहेन हस्तिव्यूहो व्याख्यातः। व्यामिश्रो वा हस्तिरथाश्वानाम्। चक्रान्तयोर्हस्तिनः, पार्श्वयोरश्वमुख्याः, रथा उरस्ये। हस्तिनामुरस्यं रथानां कक्षावश्वानां पक्षाविति मध्यभेदी। विपरीतोऽन्तर्भेदी। हस्तिनामेव तु शुद्धः। सन्नाह्यानामुरस्यम्, औपवाह्यानां जघनं व्यालानां कोट्याविति अश्वव्यूहो वर्मिणामुरस्यं शुद्धानां कक्षपक्षाविति। पत्तिव्यूहः पुरस्तादावरणिनः पृष्ठतो धन्विन इति शुद्धाः।

पत्तयः पक्षयोरश्वः, पार्श्वयोः, हस्तिनः पृष्ठतो रथाः पुरस्तात्, परव्यूहवशेन वा विपर्यासः इति द्व्यङ्गविभागः। तेन त्र्यङ्गबलविभागो व्याख्यातः। दण्डसम्पत् सारबलं पुंसाम्। हस्त्यश्वयोर्विशेषः कुलं जातिः सत्त्वं वयः स्थता प्राणो वर्ष्म जवस्तेजः शिल्पं स्थैर्यमुदग्रता

व्यूहरचना के पश्चात् बची हुई सेना को व्यूह में ही लगा देने को आवाप कहते हैं। केवल पैदल सेना ही खपाई जाय तो उसे प्रत्यावाप कहेंगे। अश्व, रथ या हाथी में से किसी एक अङ्ग को मिलाना अन्वावाप और दूषित व्यक्तियों को सम्मिलित करना अत्यावाप कहलाता है। शत्रु ने अपनी सेना में जितना आवाप या प्रत्यावाप किया हो, जयेच्छु राजा को उससे चार वा आठ गुणा आवाप और प्रत्यावाप करना चाहिये। रथव्यूह की रचना के समान ही हाथियों की रचना जाननी चाहिये। अथवा हाथी, रथ और घोड़ों की रचना जाननी चाहिये। अथवा हाथी, रथ और घोड़ों को मिलाकर व्यूहरचना करे। सेना के आगे दोनों ओर हाथियों को, पार्श्व भाग में अश्वों को और मध्यभाग में रथों को खड़ा करे। इसे 'पक्षभेदी' व्यूह कहते हैं। यदि उरस्य भाग में हाथी, दोनों कक्षों में रथ और पार्श्वभाग में अश्व हों तो 'मध्यभेदी' व्यूह बनता है। इसके विपरीत, अर्थात् मध्यभाग में अश्व और पक्ष-कक्ष में हाथी तथा रथ हों तो 'अन्तर्भेदी' व्यूह कहलाता है। केवल हाथियों से ही रचना की गई हो तो इसे 'शुद्ध' कहते हैं। उनमें जो हाथी कवच आदि से युक्त हों उन्हें मध्य-भाग में, सवारी के काम आनेवालों को पीछे और मस्त (बिगड़ैल) हाथियों को कोटिभाग (किनारों) पर रक्खे। अश्वव्यूह की रचना में कवच से युक्त अश्वों को मध्यभाग में और कवच से रहितों को पक्ष एवं कक्ष से स्थापित करे। इसी प्रकार केवल पदाति सैनिकों से ही व्यूहरचना की जाय तो उसमें सामने कवचधारी और पीछे धनुर्धारी योद्धा रहेंगे। यह शुद्ध व्यूहों की व्याख्या हुई।

दो अङ्गों से व्यूहरचना करने पर यदि पैदल और घोड़े से व्यूहरचना की जाये तो सामने (पक्ष) में पदाति और पीछे के भाग (कक्ष) में अश्वों को रक्खे। हाथी और रथों में आगे रथ एवं पीछे हाथी रहेंगे। अथवा शत्रु के व्यूह की स्थिति को देखकर यथोचित परिवर्तन कर ले। यह दो अङ्गों से व्यूहरचना कही गई। इसी से तीन अङ्गों की रचना समझ लेनी चाहिये (तीनों अङ्गों को पक्ष-कक्ष और उरस्य में स्थापित करे।

अब सार और असार सेना को कहा जाता है—सार (पितृपितामह द्वारा परम्परागत) सेना ही वास्तव में राजा का बल होता है। हाथी और घोड़े के विषय में यह विशेष है कि कुल, जाति, सत्त्व, आयु, धैर्य, बल, लम्बाई-चौड़ाई, वेग, पराक्रम, कुशलता, स्थिरता, स्फूर्ति, वश में रहना (आज्ञा का पालन करना) एवं अन्य श्रेष्ठ लक्षण से युक्त हाथी-घोड़ों को सार बल

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

विधेयत्वं सुव्यंजनाचारतेति। पत्त्यश्वरथद्विपानां सारत्रिभागमुरस्यं स्थापयेत्, द्वौ त्रिभागौ कक्षं पक्षं चोभयतः। अनुलोममनुसारम्। प्रतिलोमं तृतीयसारम्। फल्गु प्रतिलोमम्। एवं सर्वमुपयोगं गमयेत्।

फल्गुबलमन्तेष्ववधाय वेगोऽभिहुतो भवति। सारबलमग्रतः कृत्वा कोटीष्वनुसारं कुर्यात्। जघने तृतीयसारं, मध्ये फल्गुबलमेतत्सहिष्णु भवति। व्यूहं तु स्थापयित्वा पक्षकक्षोरस्यानामेकेन द्वाभ्यां वा प्रहरेत्। शेषैः प्रतिगृह्णीयात्। यत्परस्य दुर्बलं वीतहस्त्यश्वं दूष्यामात्यकं कृतोपजाप वा, तत्प्रभूतसारेणाभिहन्यात्। यद्वा परस्य सारिष्ठं तद् द्विगुणसारेणाभिहन्यात्। यदङ्गमल्पसार-मात्मनस्तद्बहुत्वेनोपचिनुयात्। यतः परस्यापचयस्ततोऽभ्याशे व्यूहेत, यतो वा भयो भवेत्।

अभिसृतं परिसृतमतिसृतमपसृतमुन्मथ्यावधानं वलयो गोमूत्रिका मण्डलं प्रकीर्णिका व्यावृत्तपृष्ठमनुवंशमग्रतः पार्श्वाभ्यां पृष्ठतो भग्नरक्षा भग्नानुपात इत्यश्वयुद्धानि।

मानना चाहिये।

पदाति, घोड़े, रथ और हाथियों के सार बल के तीसरे भाग को उरस्य में और शेष दो तिहाई को पक्ष एवं कक्ष में दोनों ओर स्थापित करे। अनुसार (सारबल से न्यून शक्तिवाली सेना) को सार बल से पीछे रखे उससे भी कम बलवाली (तृतीय सार) सेना को सारबल से आगे नियुक्त करे और उससे भी कम (फल्गु बल) को सबसे आगे रखे। इस प्रकार सबका उपयोग जान ले।

फल्गु बल को आगे खड़ा करने से सारबल का वध नहीं होता और शत्रु का वेग भी मन्द हो जाता है। सारबल को आगे करके कोटी भागों में 'अनुसार' को स्थापित करे। पीछे 'तृतीय सार' और मध्य में फल्गु सेना को स्थापित करे इस व्यूहरचना से शत्रु का आक्रमण सहन किया जा सकता है। व्यूहरचना करके पक्ष, कक्ष और उरस्य भाग में स्थित सेना के एक वा दो अङ्गों से आक्रमण करे। शेष अङ्गों से शत्रु के आक्रमण को रोके।

जो शत्रु की सेना दुर्बल, हाथी घोड़ों से रहित, दूषित मन्त्रियों से युक्त अथवा भेद से तोड़ी हुई हो उसे पर्याप्त सारबल से समाप्त कर दे। यदि शत्रु की सारबल सेना हो तो उसे अपने दुगने सारबल से समाप्त करे। अपनी सेना के जिस अङ्ग में 'अल्पसार' हो, वहाँ अधिक संख्या में सैनिकों की नियुक्ति करे। जिधर से शत्रु की सेना का संहार हो सके उधर ही व्यूह की रचना करे अथवा जिधर से शत्रु के आक्रमण की सम्भावना हो उसी ओर मुख करके व्यूह का निर्माण करे।

अभिसृत (आगे बढ़ना), परिसृत चारों ओर से घेरा डालना, अतिसृत (अचानक धावा बोलना), अपसृत (पीछे हटना), उन्मथ्यावधान (शत्रुसेना को नष्ट करके एकत्रित होना), वलय (गोलाकार गति में चलना), गोमूत्रिका बैल के चलते समय मूत्रत्याग सदृश जो रेखा बनती है उसके समान तिरछा चलना, मण्डल, (मण्डलाकार चलना), प्रकीर्णिका (बिखर कर आक्रमण करना), व्यावृतपृष्ठ (पीछे लौटना), अनुवंश सेना के साथ चलना, आगे से, पार्श्वभागों से और पीछे से भग्न-सेना की रक्षा करना, भग्न-सेना की सहायता करना ये अश्वों के युद्ध कहे गये हैं।

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

प्रकीर्णिकावर्जान्येतान्येव, चतुर्णामङ्गानां व्यस्तसमस्तानां वा घातः।
पक्षकक्षोरस्यानां च प्रभंजनमवस्कन्दः सौप्तिकं चेति हस्तियुद्धानि।
उन्मथ्यावधानवर्जान्येतान्येव स्वभूमावभियानापयानस्थितयुद्धानीति रथयुद्धानि।
सर्वदेशकालप्रहरणमुपांशुदण्डश्चेति पत्तियुद्धानि। एतेन विधिना व्यूहानोजान् युग्मांश्च कारयेत्।
विभवो यावदङ्गानां चतुर्णां सदृशो भवेत्॥ १॥
द्वे शते धनुषां गत्वा राजा तिष्ठेत् प्रतिग्रहे। भिन्नसंघातनं तस्मान्न युध्येताप्रतिग्रहः॥ २॥

—कौ० अ०

वाशिष्ठधनुर्वेदसंहितायाम्—
संभृत्य महतीं सेनां चतुरंगां महीपतिः॥ २४२॥
व्यूहयित्वाग्रतः शूरान्स्थापयेज्जयलिप्सया। पृष्ठेन वायवो यान्ति पृष्ठे भानुर्वयांसि च॥ २४३॥
अनुप्लवन्ते मेघाश्च यस्य तस्य रणे जयः। युवास्वरे मध्यसेना युद्धं कुर्यादतन्द्रिता।
द्वे सेने पार्श्वयोश्चैका पृष्ठतो रक्षयेत् सदा॥ २४७॥
एकां विकटसेनां तु दूरस्थां भ्रामयेद्युधि। स्वल्पा युद्धं कुर्याद् बह्वी सेना च सर्वतो भ्रमेत्।

प्रकीर्णिका को छोड़ ये सब कार्य, चारों अङ्गों (पदाति, अश्व, हाथी, रथ) का नाश, बिखरे हुए या सामूहिकरूप से शत्रु का घात, शत्रुपक्ष की दायें-बायें या मध्य स्थित सेना का संहार, शत्रु के छिद्र देखकर प्रहार करना और सोते हुए सैनिकों को कुचलना—ये हाथियों द्वारा किये जानेवाले युद्ध हैं।

उन्मथ्यावधान (शत्रुसेना को मर्दित करना) को छोड़ पूर्वोक्त सभी कार्य रथों के द्वारा किये जाते हैं। अपनी भूमि में स्थित होकर शत्रु पर चढ़ाई करना, आक्रमण करके पीछे हटना और एक स्थान पर स्थिर रहकर युद्ध करना—ये रथों द्वारा किये जानेवाले युद्ध हैं।

सभी स्थानों एवं कालों में शत्रु-सेना पर प्रहार करना एवं अपनी सेना की रक्षा करना—यह पदाति सैनिकों का युद्ध कहा गया है।

इस विधि से राजा पूर्वोक्त अयुग्म और युग्म व्यूहों की रचना करवावे। जितनी चतुरङ्गिणी सेना अपने पास हो उसके अनुसार ही व्यूह रचना करे॥ १॥

स्वयं राजा मुख्य युद्धस्थल से दो सौ धनुष दूर रहकर प्रतिग्रह (पीछे सुरक्षित सेना) में स्थित रहे। वहीं से भिन्न सेना को पुनः व्यवस्थित करके युद्ध करे। बिना प्रतिग्रह के राजा को अन्यत्र रहकर युद्ध करना उचित नहीं है॥ २॥

वाशिष्ठ धनुर्वेद संहिता में—राजा विशाल एवं चतुरङ्ग सेना का संग्रह करके व्यूह रचना में जय की इच्छा से आगे शूरवीरों को नियुक्त करे। व्यूह-रचना इस प्रकार करे कि वायु पीछे की ओर से बहे। सूर्य भी अपने पीछे रहे। जिसके पीछे से पक्षी उड़ते हों और मेघों की गति भी पीछे से हो तो उस राजा की युद्ध में विजय अवश्य होती है।

युवा स्वरवाली मध्यभाग में स्थित सेना सावधान होकर युद्ध करे। दो सेनायें (पक्षों में स्थित) और एक सेना पीछे रहकर मध्यसेना की रक्षा करे। एक विकट (जो भयङ्कर प्रहार करने में दक्ष हो) दूर रहकर युद्धक्षेत्र में घूमती रहे॥ २४७½॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

समभूमौ चाश्ववारा युद्धं कुर्युः। जले करितुम्बिदृतिनौकाभिर्युद्धं विधेयम्। पदातयो भुशुण्डिं गृहीत्वा वा धनूंषि चादाय वने वृक्षेष्वन्तर्धाना वारूढा भूत्वा युध्यत। स्थले चर्म्मखड्गभल्लैर्युध्यत। युद्धाहंकारिणस्तुङ्गाग्रे स्थाप्याः अन्ये पश्चात्। *(वा० ध० २५२)*

ये राजपुत्राः सामन्ता आप्ताः सेवकजातयः। तान् सर्वानात्मनः पार्श्वे रक्षायै स्थापयेन्नृपः॥ २३५॥

परम्परानुरक्ता ये योद्धा शार्ङ्गधनुर्धराः। युद्धज्ञास्तुरगारूढास्ते जयन्ति रणे रिपून्॥ २३६॥

—वा० धनु०

विष्णुधर्मोत्तरे—

व्यूहानामथ सर्वेषां पञ्चधा सैन्यकल्पना। द्वौ पक्षौ बन्धपक्षौ द्वावुरस्यः पञ्चमो भवेत्॥ २०॥

अनेन यदि वा द्वाभ्यां भागाभ्यां युद्धमाचरेत्। भागत्रयं स्थापयेत्तु तेषां रक्षार्थमेव च॥ २१॥

न व्यूहे कल्पना कार्या राज्ञो भवति कर्हिचित्। पत्रच्छेदे फलच्छेदे वृक्षछेदावकल्पने॥ २२॥

पुनः प्ररोहमायाति मूलच्छेदे विनश्यति। स्वयं राज्ञा न योद्धव्यमपि सर्वास्त्रशालिना॥ २३॥

नित्यं लोके हि दृश्यन्ते शक्तेभ्यः शक्तिमत्तराः। सैन्यस्य पश्चात्तिष्ठेत्तु क्रोशमात्रे महीपतिः॥ २४॥

युद्ध करते समय थोड़ी सेना ही युद्ध करे। बहुत-सी सेना चारों ओर घूमती रहे। समभूमि में श्रेष्ठ घोड़ों पर सवार होकर युद्ध करें। जल में हाथी पर बैठकर, तुम्बि, मशक या नावों पर चढ़कर युद्ध करना उचित है। पैदल सैनिक बन्दूक या धनुष लेकर वन या वृक्षों की आड़ लेकर अथवा वृक्षों पर चढ़कर युद्ध करें। स्थल में ढाल, तलवार और भालों से लड़ें। युद्ध का अहङ्कार करनेवाले और तीव्रगतिवाले सैनिकों को आगे और अन्यों को पीछे रखे॥ २५२॥

जो राजकुमार, सामन्त, सेवक, विज्ञ सैनिक हों उन्हें राजा अपनी रक्षा के लिये अपने समीप ही रखे।

जो योद्धा कुल-परम्परा से अपनी सेना में हों एवं शार्ङ्ग आदि धनुषों को धारण करके घोड़ों पर आरूढ़ हों एवं युद्ध करने में कुशल हों, वे ही रण में शत्रु को जीतते हैं।

विष्णुधर्मोत्तर में—सभी व्यूहों को पाँच भागों में विभक्त करके बनाया जाता है—दो पक्ष, दो बन्धपक्ष (कक्ष) और उरस्य॥ २०॥

उरस्य अथवा दो भागों (पक्ष) से युद्ध करे। शेष तीनों भाग उनकी रक्षा के लिये ही सुरक्षित रखे॥ २१॥

राजा को स्वयं व्यूह में सम्मिलित नहीं होना चाहिये, क्योंकि पत्ते, फल और वृक्ष का छेदन करने पर वह पुनः हरा-भरा हो जाता है, किन्तु मूल के काटने पर नष्ट हो जाता है। राजा ही मूल है॥ २२॥

इसलिये राजा को सभी अस्त्र-शस्त्रों से युक्त होकर भी स्वयं युद्ध नहीं करना चाहिये॥ २३॥

इस संसार में एक बलवान् व्यक्ति से दूसरे अधिक बलवान् भी देखे जाते हैं, अतः राजा स्वयं युद्ध न करके सेना से एक कोश दूर स्थित रहे॥ २४॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi



CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

भग्नसन्धारणं तत्र योद्धानां परिकीर्तितम्। प्रधानभङ्गे सैन्यस्य नावस्थानं विधीयते॥ २५॥
न भङ्गान् पीडयेच्छत्रूनेकायनगता हि ते। मरणे निश्चिताः सर्वे हन्युः शत्रूंश्चमूरपि॥ २६॥
शटाभङ्गछलेनापि नयति स्वभुवं पराम्। तेषां स्वभूमिसंस्थानां वधः स्यात् सुकरस्तथा॥ २७॥
न संहतार्त विरलान् योधान् व्यूहे प्रकल्पयेत्। आयुधानां तु सम्मर्दो यथा न स्यात्परस्परम्॥ २८॥
तथा तु कल्पना कार्या योधानां भृगुनन्दन। भेत्तुकामं परानीकं संहतैरेव भेदयेत्॥ २९॥
भेदरक्षापरेणापि कर्त्तव्या संहता तथा। स्वेच्छया कल्पयेद् व्यूहं ज्ञात्वा वा रिपुकल्पितम्॥ ३०॥
व्यूहे भेदावहं कुर्याद् रिपुव्यूहस्य पार्थिवः। गजस्य देया रक्षार्थं चत्वारस्तु रथा द्विज॥ ३१॥
रथस्य चाश्वाश्चत्वारोऽश्वस्य तस्य च वर्मिणः। वर्मिभिश्च समास्तत्र धन्विनः परिकीर्तिताः॥ ३२॥
पुरस्ताच्चर्मिणो देया देयास्तदनु धन्विनः। धन्विनामनु चाश्वीयं रथास्तदनु योजयेत्॥ ३३॥
रथानां कुञ्जराश्चानुदातव्याः पृथिवीक्षिता। पदाति कुञ्जराश्वानां वर्म कार्यं प्रयत्नतः॥ ३४॥
अवर्मयित्वा यो वाहं चात्मानं वर्तयेन्नरः। स राम नरकं याति स्वकृतेनापि कर्मणा॥ ३५॥

वहीं से व्यूह के भग्न या सेना के पैर उखड़ जाने पर उन्हें पुनः व्यवस्थित करना राजा का कार्य कहा गया है। प्रधान (राजा) के भङ्ग हो जाने पर सेना को सँभालना दुष्कर हो जाता है॥ २५॥

हारे हुए शत्रु को पीड़ा न दे, क्योंकि वे पुनः संगठित होकर मरने का निश्चय करके पूरी सेना को परास्त कर सकते हैं॥ २६॥

चोट खाकर भी सिंह पुनः पराक्रम करता है (अपनी गुफा के निकट नहीं आने देता), अतः अपने स्थान में रहकर ही शत्रु का वध सरलता से हो सके वैसा प्रयत्न करे॥ २७॥

युद्ध में सैनिकों को न अधिक मिलाकर और न अधिक अन्तर से खड़ा करे। हे भृगुनन्दन! परस्पर एक दूसरे के शस्त्रास्त्र न टकरावें इस विधि से व्यूह रचना करनी चाहिये॥ २८½॥

शत्रु की सेना की घेराबन्दी को मिलकर ही तोड़ें। शत्रु द्वारा अपनी सेना को भेदने का प्रयास करने पर भी मिलकर ही उसका प्रतिरोध करना उचित है॥ २९½॥

व्यूहरचना स्वेच्छा से अथवा शत्रु के व्यूह की रचना को जानकर जैसे उसको तोड़ा जा सके वैसे करनी चाहिये॥ ३०½॥

एक हाथी की रक्षार्थ चार रथ, एक रथ के लिये चार अश्वारोही, एक अश्व के लिये चार ढाल तलवार लिये हुये योद्धा और उतने ही धनुर्धर होने चाहियें॥ ३१-३२॥

सबसे आगे खड्ग-चर्मधारी योद्धा, उनके पीछे धनुर्धर, पुनः घुड़सवार, उनके पश्चात् रथ और सबसे पीछे हाथियों को खड़ा करना चाहिये॥ ३३½॥

पैदल सैनिक, घोड़े और हाथी, इनके लिये कवच अवश्य ही बनवावें। जो व्यक्ति स्वयं कवचादि से अपनी रक्षा करके अपने वाहन की रक्षा नहीं करता हे परशुरामजी! वह अपने इस कुकृत्य से नरक में जाता है॥ ३४-३५॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

शूराः प्रमुखतो देया न देया भीरव क्वचित्। शूरान् वा मुखतो दत्वा स्कन्धमात्रं प्रदर्शनम्॥ ३६॥
कर्त्तव्यं भीरुसंघेन शत्रुविद्रावकारकम्। दारयन्ति पुरस्तात् तु विद्रुता भीरवः पुरः॥ ३७॥
प्रोत्सारयते वरुणी भीरून् शूरान् पुनः स्थिता। *(वि० ध० खण्ड २, अ० १७७)*

वाद्यसङ्केतानुसारं व्यूहरचनम्—शुक्रनीतौ—

यथा देशं कल्पयेद् वा शत्रुसेनाविभेदकम्। व्यूहरचनसंकेतान् वाद्यभाषा समीरितान्॥ १०९८॥
स्वसैनिकैर्विना कोऽपि न जानाति तथा विधान्। नियोजयेच्च मतिमान्व्यूहान्नानाविधान्सदा॥ १०९९॥
अश्वानाञ्च गजानाञ्च पदातीनां पृथक्पृथक्। उच्चैः[१] संश्रावयेद् व्यूहसंकेतान्सैनिकान्नृपः॥ ११००॥
वामदक्षिणसंस्थो वा मध्यस्थो वाग्रसंस्थितः। श्रुत्वा तान्सैनिकैः कार्यमनुशिष्टं यथा तथा॥ ११०१॥
सम्मीलनं प्रसरणं परिभ्रमणमेव च। आकुञ्चनं तथा यानं प्रयाणमपयानकम्॥ ११०२॥
पर्यायेण च साम्मुख्यं समुत्थानं च लुण्ठनम्। संस्थानं चाष्टदलवच्चक्रवद् गोलतुल्यकम्॥ ११०३॥

अग्निपुराणे, २४२तमेऽध्याये—

अश्वस्य प्रतियोद्धारो भवेयुः पुरुषास्त्रयः॥ ३७॥

शूरवीरों को व्यूह के अग्रभाग में खड़ा करे। कभी भी कायर पुरुषों को आगे खड़ा न करे। अथवा शूरवीरों को आगे करके उनके पश्चात् भीरु व्यक्तियों के समूह को इस प्रकार खड़ा करे कि उनके कन्धे मात्र ही दीखें, जिससे (अधिक संख्या को देखकर) शत्रु भयभीत होवे॥ ३६½॥

भीरु व्यक्ति आगे खड़े कर दिये जायें तो वे युद्ध प्रारम्भ होने पर भयभीत होकर भागने लगते हैं और उनको देखकर सारी सेना भागना प्रारम्भ कर देती है। वारुणी (शराब आदि मादक द्रव्य) भीरु को भी प्रोत्साहित कर देती है॥ ३७॥

जैसा देश हो उसी के अनुसार व्यूह बनाना उचित है, जिससे शत्रु-सेना का भेदन हो सके। बाजे की भाषा से व्यूह रचना करने के सङ्केत पूर्व से निश्चित रखने चाहियें। इन सङ्केतों को अपनी सेना के लोगों के सिवा अन्य कोई न जान सके। बुद्धिमान् राजा इन सङ्केतों के अनुसार अनेक व्यूहों की रचना करे॥ १०९८-९९॥

घुड़सवार, गजारोही और पैदल सैनिकों को राजा व्यूहरचना के सङ्केतों को उच्च स्वर में सुनवा देवे॥ ११००॥

इस समय राजा बांयीं, दाहिनी ओर या मध्य अथवा अग्रभाग में स्थित हो जावे। व्यूहरचना के सङ्केतों को सुनते ही सैनिक शिक्षा के अनुसार शीघ्र ही व्यूह रचना कर डालें॥ ११०१॥

इसी प्रकार सैनिक लोग सङ्केतों के अनुसार, एकत्रित होना, फैलना, चारों ओर घूमना, सिकुड़ना, पीछे हटना, क्रम से सामने आना, खड़े होना, लौटना, अष्टदल (पद्मव्यूह) बनाना, चक्राकार खड़े होना इत्यादि क्रियाओं को करें॥ ११०२-३॥

अग्निपुराण में—अश्व के रक्षक तीन पुरुषों को नियुक्त करे। इसी प्रकार हाथी की रक्षार्थ तीन अश्व और पन्द्रह पादरक्षक पदाति सैनिक होवें। यह एक हाथी का विधान कहा। रथ

---

१. कौटिल्यार्थशास्त्रेऽपि—अङ्गदशकस्यैकः पतिः पदिकः, पदिकदशकस्यैकः सेनापतिः तद् दशकस्यैको नायक इति। स तुर्यघोषध्वजपताकाभिर्व्यूहाङ्गानां संज्ञाः स्थापयेत्॥ (१०।६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

इति कल्प्यास्त्रयश्चाश्वा विधेयाः कुञ्जरस्य तु। पादगोपा भवेयुश्च पुरुषा दश पञ्च च॥ ३८॥
विधानमिति नागस्य विहितं स्यन्दनस्य च। अनीकमिति विज्ञेयमिति कल्प्या नव द्विपाः॥ ३९॥
तथानीकस्य रन्ध्रन्तु पञ्चधा प्रचक्षते। इत्यनीकविभागेन स्थापयेद् व्यूहसम्पदः॥ ४०॥

व्यूहस्याङ्गानि—

उरस्यकक्षपक्षांस्तु कल्प्यानेतान् प्रचक्षते। उरः कक्षौ च पक्षौ च मध्यं पृष्ठं प्रतिग्रहः॥ ४१॥
कोटी च व्यूहशास्त्रज्ञैः सप्ताङ्गो व्यूह उच्यते। उरस्यकक्षपक्षास्तु व्यूहोऽयं सप्रतिग्रहः॥ ४२॥
गुरोरेष च शुक्रस्य कक्षाभ्यां परिवर्जितः। तिष्ठेयुः सेनापतयोऽग्रवीरैः पुरुषैर्वृताः॥ ४३॥
अभेदेन च युद्धेरन् रक्षेयुश्च परस्परम्। मध्यव्यूहे फल्गुसैन्यं युद्धवस्तु जघन्यतः॥ ४४॥
युद्धं हि नायकप्राणं हन्यते तदनायकम्। उरसि स्थापयेन्नागान् प्रचण्डान् कक्षयोरथान्॥ ४५॥
हयांश्च पक्षयोर्व्यूहो मध्यभेदी प्रकीर्तितः। मध्यदेशे हयानीकं रथानीकञ्च कक्षयोः॥ ४६॥
पक्षयोश्च गजानीकं व्यूहोन्तर्भेद्ययं स्मृतः। रथस्थाने हयान् दद्यात् पदातींश्च हयाश्रये॥ ४७॥
रथाभावे तु द्विरदान् व्यूहे सर्वत्र दापयेत्। यदि स्याद् दण्डबाहुल्यमाबाधः सम्प्रकीर्तितः॥ ४८॥

के रक्षक भी हाथी के जितने भी रहेंगे। इस प्रकार नौ हाथियों से युक्त एक अनीक (सेना की एक टुकड़ी) होती है। जोकि पाँच भागों में विभक्त होती है॥ ३७-३८-३९॥

इस प्रकार सेना के विभाग करके व्यूहरचना करे॥ ४०॥

उरस्य, कक्ष और पक्षों की रचना को कहते हैं—उरस्य, कक्ष, पक्ष, मध्य, पृष्ठ, प्रतिग्रह और कोटी—ये सात अङ्ग व्यूहशास्त्र के ज्ञाताओं ने व्यूह के कहे हैं॥ ४१॥

शुक्राचार्य के मतानुसार उरस्य, कक्ष, पक्ष और प्रतिग्रहयुक्त कक्षाओं से रहित व्यूह होता है॥ ४२॥

सेनापतिगण शूरवीर सैनिकों से घिरे हुए अग्रभाग में स्थित होकर, मिलकर एक-दूसरे की रक्षा करते हुए लड़ें॥ ४३॥

व्यूह के मध्य भाग में सारहीन सेना को खड़ा करें। युद्ध के उपकरण—यन्त्र, आयुध, औषध, भोज्यसामग्री आदि पीछे रहने चाहियें॥ ४४॥

युद्ध का प्राण नायक—सेनापति या राजा होता है। नायक के न रहने पर या मारे जाने पर उसकी सेना हार जाती है॥ ४४॥

उरस्य (मध्यभाग) में प्रचण्ड हाथियों को खड़ा करे। कक्षों में रथ और दोनों पक्षों में घोड़ों को स्थापित करे, इस व्यूह को 'मध्यभेदी' कहते हैं॥ ४५॥

मध्यभाग (उरस्य) में घोड़ों की अनीक (सेना), कक्ष स्थानों में रथों की सेना और पक्ष स्थानों में हाथियों की सेना खड़ी करने पर इसे 'अन्तर्भेदी' व्यूह कहते हैं॥ ४६॥

इसी व्यूह में रथ के स्थान (कक्षदेश) में घोड़ों को तथा घोड़ों के स्थान पर पैदल सैनिकों को खड़ा करे तो यह दूसरे प्रकार का अन्तर्भेदी व्यूह है॥ ४७॥

रथों के अभाव में व्यूह में सर्वत्र हाथियों को खड़ा करे। यदि सेना का बाहुल्य हो तो उसे आबाध व्यूह कहते हैं॥ ४८॥

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

व्यूहानां भेदोपभेदाः—

मंडलासंहतो भोगो दण्डस्ते बहुधा शृणु। तिर्यग्वृत्तिस्तु दण्डः स्याद् भोगोऽन्यावृत्तिरेव च॥ ४९॥
मण्डलः सर्वतो वृत्तिः पृथग्वृत्तिरसंहतः। *(अग्नि० पु० अ० २४२)*

कौटिलीयेऽर्थशास्त्रे—

प्रपक्षकक्षोरस्या उभयोर्दण्डमण्डलासंहताः प्रकृतिव्यूहाः। तत्र तिर्यग्वृत्तिर्दण्डः। समस्ताना-न्वावृत्तिर्भोगः। सरतां सर्वतो वृत्तिर्मण्डलः। स्थितानामनीकवृत्तिरसंहतः। *(कौ० १०-६)*

दण्डस्य भेदाः—

प्रदरो दृढकोऽसह्यः चापः कुक्षिरेव च॥ ५०॥
प्रतिष्ठसुप्रतिष्ठश्च श्येनो विजयसञ्जयौ। विशालो विजयः सूची स्थूणाकर्णचमूमुखौ॥ ५१॥
सर्पास्यो वलयश्चैव दण्डभेदाश्च दुर्जयाः। [१]अतिक्रान्तः प्रतिक्रान्तः कक्षाभ्याञ्चैकपक्षतः॥ ५२॥

मण्डल, असंहत, भोग और दण्ड—ये चार मुख्य भेद हैं। जिस व्यूह की रचना दण्ड के समान (बायें से दाहिने) तिरछी हो उसे दण्डव्यूह, सर्प के समान खड़ा होना सर्पव्यूह, गोलाकार खड़ी हुई सेना जिसका सब ओर मुख हो, मण्डलव्यूह और सेनाओं को पृथक्-पृथक् खड़ी करना असंहतव्यूह कहलाता है॥ ४९½॥

आचार्य शुक्र और बृहस्पति के मतानुसार दो पक्ष, दो कक्ष और उरस्य भागों में स्थित सेना के दण्ड, मण्डल और असंहतव्यूह बन सकते हैं, एवं इनके अन्य भेदों का बनना भी सम्भव है। सेना को तिरछी (पक्ष, कक्ष, उरस्य समरेखा में) खड़ी करना दण्डव्यूह कहलाता है। इन्हीं को कई घुमाव देकर स्थित करना सर्पव्यूह होता है। शत्रु पर आक्रमण करते समय उसे चारों ओर से घेरना मण्डल और अलग-अलग सेना को खड़ा करना असंहतव्यूह कहलाता है।

दण्डव्यूह के सतरह भेद हैं—प्रदर, दृढ़क, असह्य, चाप, चापकुक्षि, प्रतिष्ठ, सुप्रतिष्ठ, श्येन, विजय, सञ्जय, विशालविजय, सूची, स्थूणाकर्ण, चमूमुख, सर्पमुख, वलय और दुर्जय॥ ५०-५१½॥

यदि उरस्य, कक्ष और पक्ष समस्थिति में हों तो दण्डव्यूह कहलाता है। यदि कक्षा के सैनिक आगे निकले हों और शेष दो स्थानों के सैनिक भीतर की ओर दबे हों तो वह व्यूह शत्रु का विदारण करने से प्रदर कहलाता है। यदि पूर्वोक्त दण्ड के कक्ष पीछे और पक्ष भीतर की ओर प्रविष्ट हों और केवल उरस्य भाग ही आगे निकला हो तो वह दृढ़क कहलाता है। यदि दोनों पक्ष आगे निकले हों तो असह्य व्यूह होता है। इन तीनों को उलटा अर्थात् जिस भाग को अतिक्रान्त किया गया है उसे प्रतिकान्त कर दिया जाय तो क्रमशः चाप, चापकुक्षि और प्रतिष्ठव्यूह बन जाते हैं॥ ५२॥

---

१. **कौटिल्यार्थशास्त्रे**—पक्षकक्षोरस्यैः समं वर्त्तमानो दण्डः। स कक्षाभिक्रान्तः प्रदरः। स एव पक्षाभ्यां प्रतिक्रान्तो दृढकः। स एवातिक्रान्तः पक्षाभ्यामसह्यः। पक्षाववस्थाप्योरस्यातिक्रान्तः श्येनः। विपर्यये चापं चापकुक्षिः प्रतिष्ठितः सुप्रतिष्ठितश्च। चापपक्षः संजयः। स एवोरस्यातिक्रान्तो विजयः। स्थूलः कर्णपक्षः **स्थूलकर्णः**। द्विगुणपक्षस्थूलो विशालविजयः। त्र्यभिक्रान्तपक्षश्चमूमुखः। विपर्यये झषास्यः। ऊर्ध्वराजिदण्डः **सूची**। द्वौ दण्डौ वलयः। चत्वारो दुर्जयः। इति दण्डव्यूहाः। (कौ० अ० १०-६)

CC-0. Shri Vipin Kumar Col. Deoband. In Public Domain.

Digitized by Madhuban Trust, Delhi

अतिक्रान्तस्तु पक्षाभ्यां त्रयोऽन्ये तद्विपर्यये। पक्षोरस्यैरतिक्रान्तः प्रतिष्ठोऽन्यो विपर्ययः॥५३॥
